eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

HaDa
11.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

angotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Fou

SRI AUROBINDO LIBRARY PONDICHERRY

श्रीमद्भट्टोजिदीक्षितविरचिता

वैयाकरणसिद्धान्तकौमुदी

तत्र

कारकप्रकरणम्

Vaiyakarana-Siddhanta-Kaumudi of
Bhattoji Dikshita

KARAKA-PRAKARANAM

एम. ए. (संस्कृते बङ्गसाहित्ये च) इत्युपाधिधारिणा
सांख्यवेदान्ततीर्थ इत्यपि चोपाधिधारिणा

अध्यापक-श्रीहरिपददत्तेन

विरचिता

कारककारिका

KARAKA-KARIKA

Written by
Prof. Haripada Datta, M. A.
(Sanskrit & Bengali)
Samkhya-Vedantatirth.

Sai 475
HaDa
11

मूल्यं रूप्यकपञ्चकम्
Price Rs. Five only

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

Published by
Miss Manorama Datta
Nischintapur,
P. O. Rampurhat,
Dist. Birbhum.

Published (First Edition) September—1973.

Copyright reserved by the author.

Printed by
Rajat Art Press.
Rampurhat,
Birbhum, (W. Bengal)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

Presented by the -
Ministry of Education
&
Social Welfare
Government of India

श्रीमद्भट्टोजिदीक्षितविरचिता

वैयाकरणसिद्धान्तकौमुदी

तत्र

कारकप्रकरणम्

Sai 475
Hada
11.

SRI AUROBINDO
LIBRARY
PONDICHERRY

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

Sai 475
'HaDa'
11.

Sai 78 -019

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

कारकप्रकरणम्

प्रथमा विभक्तिः

५३३। प्रातिपदिकार्थलिङ्परिमाणवचनमात्रे प्रथमा २।३।४६।

नियतोपस्थितिकः प्रातिपदिकार्थः। मात्रशब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये संख्यमात्रे च प्रथमा स्यात्। उच्चैः। नीचैः। कृष्णः। श्रीः। ज्ञानम्। अलिङ्गा, नियतलिङ्गाश्च 'प्रातिपदिकार्थमात्रे' इत्यस्योदाहरणम्। अनियतलिङ्गास्तु लिङ्गमात्राद्याधिक्यस्य। तटः। तटी। तटम्। परिमाणमात्रे-द्रोणो व्रीहिः। द्रोणरूपं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरित्यर्थः। प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम्, प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहौ विशेषणमिति विवेकः। वचनं-संख्या। एकः। द्वौ। बहवः। इहोक्तार्थत्वाद्विभक्तेरप्राप्तौ वचनम्।

५३४। सम्बोधने च २।३।४७।

इह प्रथमा स्यात्। हे राम।

प्रथमा विभक्तिः।

द्वितीया विभक्तिः।

५३५। कारके ७ ३।२३।

इत्यधिकृत्य।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

५६६। कर्तुरीप्सिततमं कर्म १।४।४१।

कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्। 'कर्तुः' किम्? माषेष्वश्वं बध्नाति। कर्मणा ईप्सिता माषाः, न तु कर्तुः तमब्ग्रहणं किम्? पयसा ओदनं भुङ्क्ते। 'कर्म' इत्यनुवृत्तौ पुन कर्मग्रहणमाधारनिवृत्त्यर्थम्। अन्यथा 'गेहं प्रविशति' इत्यत्रैव स्यात्

५३७। अनभिहिते २।३।२।

इत्यधिकृत्य।

५३८। कर्मणि द्वितीया २।३।२।

अनुक्ते कर्मणि द्वितीया स्यात्। हरिं भजति। अभिहिते कर्मणि 'प्रातिपदिकार्थमात्रे' इति प्रथमैव। अभिधानं च प्रायेण तिङ् कृत्तद्धितसमासैः। तिङ्—हरिः सेव्यते। कृत्-लक्ष्म्या सेवितः तद्धितः—शतेन क्रीतः शत्यः। समासः—प्राप्तः आनन्दो यं स प्राप्तानन्दः क्वचिन्निपातेनाभिधानम्। यथा—'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुम साम्प्रतम्'। साम्प्रतमित्यस्य हि युज्यत इत्यर्थः।

४३९। तथा युक्तं चानीप्सितम् १।४।५०।

ईप्सिततमवत्क्रियया युक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्यात् ग्रामं गच्छंस्तृणं स्पृशति। ओदनं भुञ्जानो विषं भुङ्क्ते।

५४०। अकथितं च १।४।५१।

अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्। "दुह्याच्य च्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम्। कर्मयुक्स्यादकथितं त स्यान्नीहृकृष्वहाम्"। 'दुह्यादीनां द्वादशानां तथा नीप्रभृतीनां चतुर

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

कर्मणा यद्युज्यते तदेवाकथितं कर्म' इति परिगणनं कर्तव्यमित्यर्थः। गां दोग्धि पयः। बलिं याचते वसुधाम्। अविनीतं विनयं याचते। तण्डुलानोदनं पचति। गर्गान् शतं दण्डयति। व्रजमवरुणद्धि गाम्। माणवकं पन्थानं पृच्छति। वृक्षमवचिनोति फलानि। माणवकं धर्मं ब्रूते, शास्ति वा। शतं जयति देवदत्तम्। सुधां क्षीरनिधिं मथ्नाति। देवदत्तं शतं मुष्णाति। ग्राममजां नयति, हरति, कर्षति, वहति वा। अर्थनिबन्धनेयं संज्ञा। बलिं भिक्षते वसुधाम्। माणवकस्य पितरं पन्थानं पृच्छति। *१२६ अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्*। कुरून् स्वपिति। मासमास्ते। गोदोहमास्ते। क्रोशमास्ते।

५४१। गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ १।४।५२।

गत्याद्यर्थानां शब्दकर्मणामकर्मकाणां चाणौ यः कर्ता स णौ कर्म स्यात्। शत्रुनगमयत्स्वर्गं वेदार्थं स्वानवेदयत्। आशयच्चामृतं देवान्वेदमध्यापयद्विधिम्॥ आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः। 'गति' इत्यादि किम्? पाचयत्योदनं देवदत्तेन। 'अण्यन्तानाम्' किम्? गमयति देवदत्तो यज्ञदत्तं, तमपरः प्रयुङ्क्ते, गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः। *१२७ नीवह्योर्न*। नाययति वाहयति वा भारं भृत्येन। *१२८ नियन्तृकर्तृकस्य वहेरनिषेधः*। वाहयति रथं वाहान्सूतः। *१२९ आदिखाद्योर्न*। आदयति खादयति वा अन्नं वटुना। *१३० भञ्जेरहिंसार्थस्य न*। भक्षयत्यन्नं वटुना। 'अहिंसार्थस्य' किम्? भक्षयति बलीवर्दान्सस्यम्। *१३१ जल्पतिप्रभृतीनामुपसङ्ख्यानम्*।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

angotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foun

जल्पयति भाषयति वा धर्मं पुत्रं देवदत्तः । *१३२ दृशेश्च*। दर्शयति हरिं भक्तान् । सूत्रे ज्ञानसामान्यार्थानामेव ग्रहणं, न तु तद्विशेषार्थानामिति अनेन ज्ञाप्यते । तेन 'स्मरति' 'जिघ्रति' इत्यादीनां न । स्मारयति घ्रापयति वा देवदत्तेन । *१३३ शब्दायतेर्न*। शब्दायति देवदत्तेन । धात्वर्थसंगृहीतकर्मत्वेनाकर्मकत्वात्प्राप्तिः । येषां देशकालादिभिन्नं कर्म न सम्भवति तेऽत्राकर्मकाः, न त्वविवक्षितकर्माणोऽपि। तेन 'मासमासयति देवदत्तम्' इत्यादौ कर्मत्वं भवत्येव। 'देवदत्तेन पाचयति' इत्यादौ तु न।

५४२। हृक्रोरन्यतरस्याम् १ । २ । ५३ ।

हृक्रोरणौ यः कर्ता स णौ वा कर्मसंज्ञः स्यात् । हारयति कारयति वा भृत्यं—भृत्येन वा कटम् । *१३४ अभिवादिदृशोरात्मनेपदे वेति वाच्यम्* अभिवादयते दर्शयते देवं भक्तं भक्तेन वा ।

५४३। अधिशीङ्स्थासां कर्म १ । ४ । ४६ ।

अधिपूर्वाणामेषामाधारः कर्म स्यात् । अधिशेते, अधितिष्ठति, अध्यास्ते वा वैकुण्ठं हरिः ।

५४४। अभिनिविशश्च १ । ४ । ४७ ।

अभिनीत्येतत्सङ्घातपूर्वस्य विशतेराधारः कर्म स्यात् । अभिनिविशते सन्मार्गम् । 'परिक्रयणे सम्प्रदानम्' - (सू ५८१) इति सूत्रादिह मण्डुकप्लुत्या अन्यतरस्यांग्रहणमनुवर्त्य व्यवस्थितविभाषाश्रयणात्क्वचिन्न। पापेऽभिनिवेशः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ngotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Fou

५४५ । उपान्वध्याङ्वसः १ । ४ । ४८ ।

उपादिपूर्वस्य वसतेराधारः कर्म स्यात् । उपवसति, अनूवसति, अधिवसति, आवसति वा वैकुण्ठं हरिः । *१३५ अभुक्त्यर्थस्य न* । वने उपवसति । *१३६ उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु । द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते* ॥ उभयतः कृष्णं गोपाः । सर्वतः कृष्णम् । धिक् कृष्णाभक्तम् । उपर्युपरि लोकं हरिः । अध्यधि लोकम् । अधोऽधो लोकम् । *१३७ अभितःपरितःसमया-निकषाहाप्रतियोगेऽपि* । अभितः कृष्णम् । परितः कृष्णम् । ग्रामं समया । निकषा लङ्काम् । हा कृष्णाभक्तम् । तस्य शोच्यत इत्यर्थः । बुभुक्षितं न प्रतिभाति किञ्चित् ।

५४६ । अन्तराऽन्तरेण युक्ते २ । ३ । ४ ।

आभ्यां योगे द्वितीया स्यात् । अन्तरा त्वां मां हरिः । अन्तरेण हरिं न सुखम् ।

५४७ । कर्मप्रवचनीयाः १ । ४ । ८३ ।

इत्यधिकृत्य ।

५४८ । अनुर्लक्षणे १ । ४ । ८४ ।

लक्षणे द्योत्येऽनुरुक्तसंक्षः स्यात् गत्युपसर्गसंज्ञाऽपवादः ।

५४९ । कर्मप्रवचनीययुक्ते द्वितीया २ । ३ । ४ ।

एतेन योगे द्वितीया स्यात् । जपमनु प्रावर्षत् । हेतुभूतज-पोपलक्षितं वर्षणमित्यर्थः । परापि 'हेतौ' (सू. ५६९) इति

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

तृतीया अनेन बाध्यते, 'लक्षणेत्थम्भूत'—(सू ५५३) इत्यादिना सिद्धे पुनः संज्ञाविधानसामर्थ्यात् ।

५५० । तृतीयार्थे १ । ४ । ८५ ।

अस्मिन्द्योत्येऽनुरुक्तसंज्ञः स्यात् । नदीमन्ववमिता सेना नद्या सेह सम्बद्धेत्यर्थः । 'षिञ् बन्धने' क्तः ।

५५१ । हीने १ । ४ । ८६ ।

हीने द्योत्येऽनु प्राग्वत् । अनु हरिं सुराः । हरेर्हीना इत्यर्थः ।

५५२ । उपोऽधिके च १ । ४ । ८७ ।

अधिके हीने च द्योत्ये उपेत्यव्ययं प्राक्संज्ञं स्यात् । अधिके सप्तमी वक्ष्यते । हीने उप हरिं सुराः ।

५५३ । लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः १ । ५ । ९० ।

एष्वर्थेषु विषयभूतेषु प्रत्यादय उक्तसंज्ञाः स्युः । लक्षणे वृक्षं प्रति, परि, अनु वा विद्योतते विद्युत् । इत्थम्भूताख्याने-भक्तो विष्णुं प्रति, परि, अनु वा । भागे-लक्ष्मीर्हरिं प्रति, परि, अनु वा । हरेर्भाग इत्यर्थः । वीप्सायाम्—वृक्षं वृक्षं प्रति, परि, अनु वा सिञ्चति । अत्रोपसर्गत्वाभावान्न षत्वम् । 'एषु' किम् ? परिषिञ्चति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

५५४ । अभिरभागे १ । ४ । ९१ ।

भागवर्जे लक्षणादावभिरुक्तसंज्ञः स्यात् । हरिमभि वर्तते । भक्तो हरिमभि । देवं देवमभिसिञ्चति । 'अभागे' किम् ? यदत्र ममाभिष्यात्तद्दीयताम् ।

५५५ । अधिपरी अनर्थकौ १ । ४ । ९३ ।

उक्तसंज्ञौ स्तः । कुतोऽध्यागच्छति । कुतः पर्यागच्छति । गतिसंज्ञाबाधात् 'गतिर्गतौ' (सू. ३१७७) इति निघातो न ।

५५६ । सुः पूजायाम् १ । ४ । ९४ ।

सुसिक्तम् । सुस्तुतम् । अनुपसर्गत्वान्न षः । 'पूजायाम्' किम् ? सुषिक्तं किं तवात्र ? क्षेपोऽयम् ।

५५७ । अतिरतिक्रमणे च १ । ४ । ९५ ।

अतिक्रमणे, पूजायां च अतिः कर्मप्रवचनीयसंज्ञः स्यात् । अतिदेवान्कृष्णः ।

५५८ । अपिः पदार्थसम्भावनाऽन्वत्रसर्गगर्हासमुच्चयेषु १ । ४ । ९६ ।

एषु द्योत्येष्वपिरुक्तसंज्ञः स्यात् । सर्पिषोऽपि स्यात् । अनुपसर्गत्वान्न षः । सम्भावनायां लिङ् । तस्या एव विषयभूते भवने कर्तृदौर्लभ्यप्रयुक्तं दौर्लभ्यं द्योतयन्नपिशब्दः स्यादित्यनेन सम्बध्यते । 'सर्पिषः' इति षष्ठी तु अपिशब्दबलेन गम्यमानस्य बिन्दोरवयवावयविभावसम्बन्धे । इयमेव ह्यपिशब्दस्य पदार्थद्योतकता नाम ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

द्वितीया तु नेह प्रवर्तते, सर्पिषो बिन्दुना योगो न त्वपिनेत्युक्तत्वात्। अपि स्तुयाद्विष्णुम्। सम्भावनं शक्त्युत्कर्षमाविष्कर्तुमत्र्यवितः। अपि स्तुहि। अन्ववसर्गः कामचारानुज्ञा। धिग्देवदत्तम् अपि स्तुयाद् वृषलम्, गर्हा। अपि सिञ्च। अपि स्तुहि-समुच्चये।

५५९। कालाध्वनोरत्यन्तसंयोगे २।३।५।

इह द्वितीया स्यात्। मासं कल्याणी। मासमधीते। मासं गुडधानाः। क्रोशं कुटिला नदी। क्रोशमधीते। क्रोशं गिरिः। 'अत्यन्तसंयोगे' किम्? मासस्य द्विरधीते। क्रोशस्यैकदेशे पर्वतः।

द्वितीया विभक्तिः।

तृतीया विभक्ति।

५६०। स्वतन्त्रः कर्ता १।४।५४।

क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्त्ता स्यात्।

५६१। साधकतमं करणम् १।४।४२।

क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्। तमब्ग्रहणं किम्? गङ्गायां घोषः।

५६२। कर्तृकरणयोस्तृतीया २।३।१८।

अनभिहिते कर्तरि, करणे च तृतीया स्यात्। रामेण बाणेन हतो वाली। *१३८ प्रकृत्यादिभ्य उपसङ्ख्यानम्*। प्रकृत्या चारुः। प्रायेण याज्ञिकः। गोत्रेण गार्ग्यः। समेनैति। विषमेणैति। द्विद्रोणेन धान्यं क्रीणाति। सुखेन दुःखेन वा याति। इत्यादि।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

angotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foun

५६३। दिवः कर्म च १ | ४ | ४३ |

दिवः साधकतमं कारकं कर्मसंज्ञं स्याच्चात् करणसंज्ञम्। अक्षैरक्षान्वा दीव्यति।

५६४। अपवर्गे तृतीया २ | ३ | ६

अपवर्गः=फलप्राप्तिः, तस्यां द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात्। अह्ना, क्रोशेन वा अनुवाकोऽधीतः। 'अपवर्गे' किम्? मासमधीतो नायातः।

५६५। सहयुक्तेऽप्रधाने २ | ३ | १९

सहार्थेन युक्तेऽप्रधाने तृतीया स्यात्। पुत्रेण सहागतः पिता। एवं साकंसार्धंसमंयोगेऽपि। विनापि तद्योगं तृतीया, 'वृद्धो यूना—' (सू. ९३३) इत्यादिनिर्देशात्।

५६६। येनाङ्गविकारः २ | ३ | २०

येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततस्तृतीया स्यात्। अक्ष्णा काणः। अक्षिसम्बन्धिकाणत्वविशिष्ट इत्यर्थः। 'अङ्गविकारः' किम्? अक्षि काणमस्य।

५६७। इत्थम्भूतलक्षणे २ | ३ | २१ |

किञ्चित्प्रकारं प्राप्तस्य लक्षणे तृतीया स्यात्। जटाभिस्तापसः। जटाज्ञाप्यतापसत्वविशिष्ट इत्यर्थः।

५६८। संज्ञोऽन्यतरस्यां कर्मणि २ | ३ | २२ |

सम्पूर्वस्य जानातेः कर्मणि तृतीया वा स्यात्। पित्रा पितरं वा सञ्जानीते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

५६९ । हेतौ २ । ३ । २३ ।

हेत्वर्थे तृतीया स्यात् । द्रव्यादिसाधारणं निर्व्यापारसाधारणं च हेतुत्वम् । करणत्वं तु क्रियामात्रविषयं व्यापारनियतं च । दण्डेन घटः । पुण्येन दृष्टो हरिः । फलमपीह हेतुः । अध्ययनेन वसति । गम्यमानाऽपि क्रिया कारकविभक्तौ प्रयोजिका । अलं श्रमेण । श्रमेण साध्यं नास्तीत्यर्थः । इह साधनक्रियां प्रति श्रमः करणम् । शतेन शतेन वत्सान् पाययति पयः । शतेन परिच्छिद्येत्यर्थः । *१३९ अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया* । दास्या संयच्छते कामुकः । धर्म्ये तु-भार्यायै संयच्छति ।

तृतीया विभक्तिः ।

चतुर्थी विभक्तिः ।

५७० । कर्मणा यमभिप्रैति स सम्प्रदानम् १ । ४ । ३२ ।

दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः स्यात् ।

५७१ । चतुर्थी सम्प्रदाने २ । ३ । १३

विप्राय गां ददाति । अनभिहित इत्येव । दानीयो विप्रः । *१४० क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्* । पत्ये शेते । *१४१ यजेः कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा* । पशुना रुद्रं यजते । पशुंरुद्राय ददातीत्यर्थः ।

५७२ । रुच्यर्थानां प्रीयमाणः १ । ४ । ३३ ।

रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः सम्प्रदानं स्यात् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

हरये रोचते भक्तिः। अन्यकर्तृकोऽभिलाषो रुचिः, हरिनिष्ठप्रीतेर्भक्तिः कर्त्री। 'प्रीयमाणः' किम्? देवदत्ताय रोचते मोदकः पथि।

५७३। श्लाघह्न्वङ्क्थाशपां ज्ञीप्स्यमानः १ | ४ | ३४ |

एषां प्रयोगे बोधयितुमिष्टः सम्प्रदानं स्यात्। गोपी स्मरात्कृष्णाय श्लाघते, ह्नुते, तिष्ठते, शपते वा। 'ज्ञीप्स्यमानः' किम्। देवदत्ताय श्लाघते पथि।

५७४। धारेरुत्तमर्णः १ | ४ | ३५ |

धारयतेः प्रयोगे उत्तमर्णः उत्तमसंज्ञः स्यात्। भक्ताय धारयति मोक्षं हरिः। उत्तमर्णः किम्? देवदत्ताय शतं धारयति ग्रामे।

५७५। स्पृहेरीप्सितः ३ | ४ | ३६ |

स्पृहयतेः प्रयोगे इष्टः प्रम्प्रदानं स्यात्। पुष्पेभ्यः स्पृहयति। 'ईप्सितः' किम्? पुष्पेभ्यो वने स्पृहयति। ईप्सितमात्रे इयं संज्ञा। प्रकर्षविवक्षायां तु परत्वात्कर्मसंज्ञा। पुष्पाणि स्पृहयति।

५७६। क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः १ | ४ | ३७ |

क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः स उत्तमसंज्ञः स्यात्। हरये क्रुध्यति, द्रुह्यति, ईर्ष्यति, असूयति। 'यं प्रति कोपः' किम्? भार्यामीर्ष्यति-मैनामन्योऽद्राक्षीदिति। क्रोधोऽमर्षः। द्रोहोऽपकारः। ईर्ष्या अक्षमा। असूया गुणेषु दोषाविष्करणम्। द्रोहादयोऽपि कोपप्रभवा एव गृह्यन्ते। अतो विशेषणं सामान्येन 'यं प्रति कोपः' इति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

angotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foun

५७७। क्रुधद्रुहोरुपसृष्टयोः कर्म १ । ४ । ३८ ।

सोपसर्गयोरनयोर्यं प्रति कोपस्तत्कारकं कर्मसंज्ञं स्यात् क्रूरमभिक्रुध्यति। अभिद्रुह्यति।

५७८। राधीक्ष्योर्यस्य विप्रश्नः १ । ४ । ३९ ।

एतयोः कारकं सम्प्रदानं स्यात्। यदीयो विविधः प्रश्नः क्रियते। कृष्णाय राध्यति, ईक्षते वा। पृष्टो गर्भः शुभाशुभं पर्यालोचयतीत्यर्थः।

५७९। प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्ता १ । ४ । ४० ।

आभ्यां परस्य श्रृणोतेर्योगे पूर्वस्य प्रवर्तनरूपव्यापारस्य कर्ता सम्प्रदानं स्यात्। विप्राय गां प्रतिश्रृणोति, आश्रृणोति वा। विप्रेण 'मह्यं' देहि' इति प्रवर्तितः प्रतिजानीते इत्यर्थः।

५८०। अनुप्रतिगृणश्च १ । ४ । ४१ ।

आभ्यां गृणातेः कारकं पूर्वव्यापारस्य कर्तृभूतमुक्तसंज्ञं स्यात्। होत्रेऽनुगृणाति, प्रतिगृणाति। होता प्रथमं शंसति, तमध्वर्युः प्रोत्साहयतीत्यर्थः।

५८१। परिक्रयणे सम्प्रदानमन्यतरस्याम् १ । ४ । ४४ ।

नियतकालं भृत्या स्वीकरणं परिक्रयणम्, तस्मिन्साधकतमं कारकं सम्प्रदानसंज्ञं वा स्यात्। शतेन-शताय वा परिक्रीतः। *१४२ तादर्थ्ये चतुर्थी वाच्या*। मुक्तये हरिं भजति। *१४३ क्लृपि सम्पद्यमाने च*। भक्तिर्ज्ञानाय कल्पते, सम्पद्यते, जायते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

इत्यादि । *१४४ उत्पातेन ज्ञापिते च * । वाताय कपिला विद्युत् । *१४५ हितयोगे च * । ब्राह्मणाय हितम् ।

५८२ । क्रियार्थोपपदस्य च कर्मणि स्थानिनः २ । ३ । १४ ।

क्रियार्था क्रिया उपपदं यस्य तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात् । फलेभ्यो याति । फलान्याहर्तुं यातीत्यर्थः । नमस्कुर्मो नृसिंहाय । नृसिंहमनुकूलयितुमित्यर्थः । एवं 'स्वयम्भुवे नमस्कृत्य' इत्यादावपि ।

५८३ । तुमर्थाच्च भाववचनात् २ । ३ । १५ ।

'भाववचनाश्च' (सू ३१८२) इति सूत्रेण यो विहितस्तदन्ताच्चतुर्थी स्यात् । यागाय याति यष्टुं यातीत्यर्थः ।

५८४ । नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च २ । ३ । १६ ।

एभिर्योगे चतुर्थी स्यात् । हरये नमः । 'उपपदविभक्तेः करकविभक्तिर्बलीयसी' (प. १०३) । नमस्करोति देवान् । प्रजाभ्यः स्वस्ति । दैत्येभ्यो हरिरलं, प्रभुः, समर्थः, शक्त इत्यादि । प्रभ्वादियोगे षष्ठ्यपि साधुः, 'तस्मै प्रभवति—' (सू. १७६५) 'स एषां ग्रामणीः' (सू. १८७८) इति निर्देशात् । तेन 'प्रभुर्भूषुर्भुवनत्रयस्य' इति सिद्धम् । वषडिन्द्राय । चकारः पुनर्विधानार्थः । तेनाशीर्विवक्षायां परामपि 'चतुर्थी चाशिषि—' (सू ६३२) इति षष्ठीं बाधित्वा चतुर्थ्येव भवति. स्वस्ति गोभ्यो भूयात् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

५८५। मन्यकर्मण्यनादरे विभाषाऽप्राणिषु २ | ३ | १७ |

प्राणिवर्जे 'मन्यतेः' कर्मणि चतुर्थी वा स्यात्तिरस्कारे। न त्वां तृणं मन्ये तृणाय वा। श्यना निर्देशात्तनादिकयोगे न। न त्वां तृणं मन्ये। *१४६ अप्राणिष्वित्यपनीय नौकाकान्नशुकशृगालवर्जेष्विति वाच्यम्*। तेन 'न त्वां नावमन्नं वा मन्ये' इत्यत्राप्राणित्वेऽपि चतुर्थी न। 'न त्वां शुने मन्ये' इत्यत्र प्राणित्वेऽपि भवत्येव।

५८६। गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि २ | ३ | १२ |

अध्वभिन्ने गत्यर्थानां कर्मण्येते स्तश्चेष्टायाम्। ग्रामं ग्रामाय वा गच्छति। 'चेष्टायाम्' किम्? मनसा हरिं व्रजति। 'अनध्वनि' इति किम्? पन्थानं गच्छति। गन्त्राऽधिष्ठितेऽध्वन्येवायं निषेधः। यदा तूत्पथात्पन्था एवाक्रमितुमिष्यते तदा चतुर्थी भवत्येव, उत्पथेन पथे गच्छति।

चतुर्थी विभक्तिः।

पञ्चमी विभक्तिः।

५८७। ध्रुवमपायेऽपादानम् १ | ४ | २४ |

अपायो विश्लेषः, तस्मिन्साध्ये ध्रुवमवधिभूतं कारकमपादानं स्यात्।

५८८। अपादाने पञ्चमी २ | ३ | २८ |

ग्रामादायाति। धावतोऽश्वात्पतति। 'कारकम्' किम्? वृक्षस्य पर्णं पतति। *१४७ जुगुप्साविरामप्रमादार्थानामुपसङ्ख्यानम्*

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

पापाज्जुगुप्सते, विरमति। धर्मात्प्रमाद्यति।

५८९। भीत्रार्थानां भयहेतुः १।४।२५।

भयार्थानां, त्राणार्थानां च प्रयोगे भयहेतुरपादानं स्यात्। चोराद्बिभेति। चोरात् त्रायते। 'भयहेतुः' किम्? अरण्ये बिभेति, त्रायते वा।

५९०। पराजेरसोढः १।४।२६।

पराजेः प्रयोगेऽसह्योऽर्थोऽपादानं स्यात्। अध्ययनात्पराजयते। ग्लायतीत्यर्थः। 'असोढः' किम्? शत्रून्पराजयते। अभिभवतीत्यर्थः।

५९१। वारणार्थानामीप्सितः १।४।३७।

प्रवृत्तिविघातो वारणम्। वारणार्थानां धातूनां प्रयोगे ईप्सितोऽर्थोऽपादानं स्यात्। यवेभ्यो गां वारयति। 'ईप्सितः' किम्? यवेभ्यो गां वारयति क्षेत्रे।

५९२। अन्तर्धौ येनादर्शनमिच्छति १।४।२८।

व्यवधाने सति यत्कर्तृकस्यात्मनो दर्शनस्याभावमिच्छति तदपादानं स्यात्। मातुर्निलीयते कृष्णः। 'अन्तर्धौ' किम्? चौरान्न दिदृक्षते। 'इच्छति' ग्रहणं किम्? अदर्शनेच्छायां सत्यां सत्यपि दर्शने यथा स्यात्।

५९३। आख्यातोपयोगे १।४।२८।

नियमपूर्वकविद्यास्वीकारे वक्ता प्राक्संज्ञः स्यात्। उपाध्यायादधीते। 'उपयोगे' किम्? नटस्य गथां शृणोति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

५९४। जनिकर्तुः प्रकृतिः १ | ४ | ३० |

जायमानस्य हेतुरपादानं स्यात्। ब्रह्मणः प्रजाः प्रजायन्ते।

५९५। भुवः प्रभवः १ | ४ | ३१ |

भवनं भूः। भूकर्तुः प्रभवस्तथा। हिमवतो गङ्गा प्रभवति तत्र प्रकाशत इत्यर्थः। * १४८ ल्यब्लोपे कर्मण्यधिकरणे च * प्रासादात्प्रेक्षते। आसनात्प्रेक्षते। प्रासादमारुह्य, आसने उपवि प्रेक्षत इत्यर्थः। श्वशुराज्जिह्रीते। श्वशुरं वीक्षेतेत्यर्थः। *१४ गम्यमानापि क्रिया कारकविभक्तीनां निमित्तम्*। करमात्त्वम् नद्याः। *१५० यतश्चाध्वकालनिर्माणं तत्र पञ्चमी *। * १५ तद्युक्तादध्वनः प्रथमासप्तम्यौ*। *१५२ कालात्सप्तमी च वक्तव्या* वनाद् ग्रामो योजनं योजने वा। कार्तिक्या आग्रहायणी मासे।

५९६। अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते २ | ३ | २९ |

एतैर्योगे पञ्चमी स्यात्। 'अन्य'—इत्यर्थग्रहणम्। 'इतर ग्रहणं प्रपञ्चार्थम्। अन्यो, भिन्न, इतरो वा कृष्णात्। आराद्वनात्। ऋते कृष्णात्। पूर्वो ग्रामात्। दिशि दृष्टः शब्दो दिक्शब्दः तेन सम्प्रति देशकालवृत्तिना योगेऽपि भवति, चैत्रात्पूर्वः फाल्गुनः अवयववाचियोगे तु न, 'तस्य परमाम्रेडितम्' (सू. ८३) इति निर्देशात्। पूर्वं कायस्य। अञ्चूत्तरपदस्य तु दिक्शब्दत्वेऽपि 'षष्ठ्यतसर्थ'-(सू. ६१०) इति षष्ठीं बाधितुं पृथग्ग्रहणम्। प्राक् प्रत्यग्वा ग्रामात्। आच् दक्षिणा ग्रामात्। आहि-दक्षिणाहि ग्रामात्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

'अपादाने पञ्चमी' (सू. ५८८) इति सूत्रे 'कार्तिक्याः प्रभृति' इति भाष्यप्रयोगात्प्रभृत्यर्थयोगे पञ्चमी। भवात्प्रभृति, आरभ्य वा सेव्यो हरिः। 'अपपरिबहिः'—(सू. ६३७) इति समासविधानात् ज्ञापकाद्बहिर्योगे पञ्चमी, ग्रामाद्बहिः।

५९७। अपपरी वर्जने १ | ४ | ८८ |
एतौ वर्जने कर्मप्रवचनीयौ स्तः।

५९८। आङ् मर्यादावचने १ | ४ | ९९ |
आङ् मर्यादायामुक्तसंज्ञः स्यात्। वचनग्रहणादभिविधावपि।

५९९। पञ्चम्यपाङ्परिभिः २ | ३ | १० |
एतैः कर्मप्रवचनीयैर्योगे पञ्चमी स्यात्। अप हरेः, परि हरेः संसारः। परिरत्र वर्जने। लक्षणादौ तु-हरिं परि। आमुक्तेः संसारः। आसकलाद् ब्रह्म।

६००। प्रतिः प्रतिनिधिप्रतिदानयोः १ | ४ | ७२ |
एतयोरर्थयोः प्रतिरुक्तसंज्ञः स्यात्।

६०१। प्रतिनिधिप्रतिदाने च यस्मात् २ | ३ | ११ |
अत्र कर्मप्रवचनीयैर्योगे पञ्चमी स्यात्। प्रद्युम्नः कृष्णात्प्रति। तिलेभ्यः प्रति यच्छति माषान्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

६०२। अकर्तर्युणे पञ्चमी २। ३। २४।

कर्तृवर्जितं यदृणं हेतुभूतं ततः पञ्चमी स्यात्। शताद् बद्धः 'अकर्तरि' किम्? शतेन बन्धितः।

६०३। विभाषा गुणेऽस्त्रियाम् २। ३। २५।

गुणे हेतावस्त्रीलिङ्गे पञ्चमी वा स्यात्। जाड्यात्—जाड्येन वा बद्धः। 'गुणे' किम्? धनेन कुलम्। 'अस्त्रियाम्' किम्? बुद्ध्या मुक्तः। 'विभाषा' इति योगविभागादगुणे स्त्रियां च क्वचित्। धूमादग्निमान्। नास्ति घटोऽनुपलब्धेः।

६०४। पृथग्विनानाभिस्तृतीयाऽन्यतरस्याम् २। ३। ३२।

एभिर्योगे तृतीया स्यात्पञ्चमीद्वितीये च। अन्यतरस्यांग्रहणं समुच्चयार्थम्। पञ्चमी-द्वितीये चानुवर्तेते पृथग् रामेण-रामात्-रामं वा। एवं विना, नाना।

६०५। करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य २। ३। ३३।

एभ्योऽद्रव्यवचनेभ्यः करणे तृतीयापञ्चम्यौ स्तः। स्तोकेन स्तोकाद्वा मुक्तः। द्रव्ये तु स्तोकेन विषेण हतः।

६०६। दूरान्तिकार्थेभ्यो द्वितीया च २। ३। ३५।

एभ्यो द्वितीया स्याच्चात्पञ्चमीतृतीये। प्रातिपदिकार्थमात्रे विधिरयम्। ग्रामस्य दूरम्-दूरात्-दूरेण वा, अन्तिकम्-अन्तिकात्-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

अन्तिकेन वा। 'असत्त्ववचनस्य' इत्यनुवृत्तेर्नेह-दूरः पन्थाः।

पञ्चमि विभक्तिः।

षष्ठी विभक्तिः।

६०७। षष्ठी शेषे २ । ३ । ५० ।

कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः, तत्र षष्ठी स्यात्। राज्ञः पुरुषः। कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव। सतां गतम्। सर्पिषो जानीते। मातुः-स्मरति। एधो दकस्योपस्कुरुते। भजे शम्भोश्चरणयोः। फलानां तृप्तः।

६०८। षष्ठी हेतुप्रयोगे २ ३ । २६ ।

हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात्। अन्नस्य हेतोर्वसति।

६०९। सर्वनाम्नस्तृतीया च २ । ३ । २७ ।

सर्वनाम्नो हेतुशब्दस्य च प्रयोगे हेतौ द्योत्ये तृतीया स्यात्षष्ठी च। केन हेतुना वसति। कस्य हेतोः। *१५३ निमित्तपर्याय-प्रयोगे सर्वासां प्रायदर्शनम्*। किं निमित्तं वसति, केन निमित्तेन, कस्मै निमित्ताय। इत्यादि। एवं 'किं कारणम्' 'को हेतुः' 'किं प्रयोजनम्' इत्यादि। प्रायग्रहणादसर्वनाम्नः प्रथमाद्वितीये न स्तः। ज्ञानेन निमित्तेन हरिः सेव्यः। ज्ञानाय निमित्ताय। इत्यादि।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

६१० । षष्ठ्यतसर्थप्रत्ययेन २ । ३ । ३० ।

एतद्योगे षष्ठी स्यात् । '-दिक्छब्द—' (सू ५९६) इति पञ्चम्या अपवादः । ग्रामस्य दक्षिणातः, पुरः, पुरस्तात्, उपरि, उपरिष्टात् ।

६११ । एनपा द्वितीया २ । ३ । ३१ ।

एनबन्तेन योगे द्वितीया स्यात् । 'एनपा' इति योगविभागात्षष्ठ्यपि । दक्षिणेन ग्रामं ग्रामस्य वा । एवम् उत्तरेण ।

६१२ । दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् २ । ३ । ३४ ।

एतैर्योगे षष्ठी स्यात्पञ्चमी च । दूरं, निकटं ग्रामास्य—ग्रामाद्वा ।

६१३ । ज्ञोऽविदर्थस्य करणे २ । ३ । ५१ ।

जानातेरज्ञानार्थस्य करणे शेषत्वेन विवक्षिते षष्ठी स्यात् । सर्पिषो ज्ञानम् ।

६१४ । अधीगर्थदयेशां कर्मणि २ । ३ । ५२ ।

एषां कर्मणि शेषे षष्ठी स्यात् । मातुः स्मरणम् । सर्पिषो दयनम्, ईशनं वा ।

६१५ । कृञः प्रतियत्ने २ । ३ । ५३ ।

कृञः कर्मणि शेषे षष्ठी स्याद् गुणाधाने । एधो दकस्योपस्करणम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

६१६ । रुजार्थानां भाववचनानामज्वरेः २ । ३ । ५४ ।

भावकर्तृकाणां ज्वरिवर्जितानां कर्मणि शेषे षष्ठी स्यात् । चौरस्य रोगस्य रुजा । *१५४ । अज्वरिसन्ताप्योरिति वाच्यम्* । रोगस्य चौरज्वरः, चौरसन्तापो वा । रोगकर्तृकं चौरसम्बन्धि ज्वरादिकमित्यर्थः ।

६१७ । आशिषि नाथः २ । ३ । ५५ ।

आशीरर्थस्य नाथतेः शेषे कर्मणि षष्ठी स्यात् । सर्पिषो नाथनम् । 'आशिषि' इति किम् ? माणवकनाथनम् । तत्सम्बन्धिनी याच्ञेत्यर्थः ।

६१८ । जासिनिप्रहणनाटक्राथपिषां हिंसायाम् २ । ३ । ५६ ।

हिंसार्थानामेषां शेषे कर्मणि षष्ठी स्यात् । चौरस्योज्जासनम् । निप्रौ संहतौ विपर्यस्तौ व्यस्तौ वा । चौरस्य निप्रहणनम्, प्रणिहननम्, निहननम्, प्रहणनं वा । 'नट अवस्कन्दने'चुरादिः । चौरस्योन्नाटनम् । चौरस्य क्राथनम् ? वृषलस्य पेषणम् । 'हिंसायाम्'किम् ? धानापेषणम् ।

६१९ । व्यवहृपणोः समर्थयोः २ । ३ । ५७ ।

शेषे कर्मणि षष्ठी स्यात् । द्यूते क्रयविक्रयव्यवहारे चानयोस्तुल्यार्थता । शतस्य व्यवहरणं पणनं वा । 'समर्थयोः' किम् ? शलाकाव्यवहारः । गणनेत्यर्थः ब्राह्मणपणनम् । स्तुतिरित्यर्थः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

६२०। दिवस्तदर्थस्य २ । ३ । ५८ ।

द्यूतार्थस्य क्रयविक्रयरूपव्यवहारार्थस्य च दिवः कर्मणि ष
स्यात्। शतस्य दीव्यति। तदर्थस्य किम्? ब्राह्मणं दीव्यति
स्तौतीत्यर्थः।

६२१। विभाषोपसर्गे २ । ३ । ५९ ।

पूर्वयोगापवादः। शतस्य शतं वा प्रदिदीव्यति।

६२२। प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने २ । ३ । ६१ ।

देवतासम्प्रदानेऽर्थे वर्तमानयोः प्रेष्यब्रुवोः कर्मणो हविर्विशेष
वाचकाच्छन्दात्षष्ठी स्यात्। अग्नये छागस्य हविषो वपाया मेदसः प्रे
अनुब्रूहि वा।

६२३। कृत्वोऽर्थप्रयोगे कालेऽधिकरणे २ । ३ । ६४ ।

कृत्वोऽर्थानां प्रयोगे कालवाचिन्यधिकरणे शेषे षष्ठी स्यात्
पञ्चकृत्वोऽह्नो भोजनम्। द्विरह्नो भोजनम्। 'शेषे' किम्? द्वि
हन्मध्ययनम्।

६२४। कर्तृकर्मणोः कृति २ । ३ । ६५ ।

कृद्योगे कर्तरि, कर्मणि च षष्ठी स्यात्। कृष्णस्य कृतिः
जगतः कर्ता कृष्णः। *१५५ गुणाकर्मणि वेष्यते*। नेता अश्व
स्य घ्नं वा। 'कृति' किम्? तद्धिते मा भूत्। कृतपूर्वी कटम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foun

६२५। उभयप्राप्तौ कर्मणि २ । ३ । ६६ ।

उभयोः प्राप्तिर्यस्मिन्कृति तत्र कर्मण्येव षष्ठी स्यात्। आश्चर्यो गवां दोहोऽगोपेन। *१५६ स्त्रीप्रत्प्रययोरककारयोर्नायं नियमः*। भेदिका, बिभित्सा वा रुद्रस्य जगतः। *१५७ शेषे विभाषा*। स्त्रीप्रत्यय इत्येके। विचित्रा जगतः कृतिर्हरेः-हरिणा वा। केचिद-विशेषेण विभाषामिच्छन्ति। शब्दानामनुशासनमाचार्येण—आचार्यस्य वा।

६२६। क्तस्य च वर्तमाने २ । ३ । ६७ ।

वर्तमानार्थस्य क्तस्य योगे षष्ठी स्यात्। 'न लोक—' (सू. ६२८) इति निसेधस्यापवादः। राज्ञां मतो, बुद्धः, पूजितो वा।

६२७। अधिकरणवाचिनश्च २ । ३ । ६८ ।

क्तस्य योगे षष्ठी स्यात्। इदमेषामासितं, शयितं, गतं, भुक्तं वा।

६२८। न लोकाव्ययनिष्ठाखलर्थतृनाम् २ । ३ । ६९ ।

एषां प्रयोगे षष्ठी न स्यात्। लादेशः-कुर्वन् कुर्वाणो वा सृष्टिं हरिः। उः-हरिं दिदृक्षुः, अलङ्करिष्णुर्वा। उक-दैत्यान्धातुको हरिः। *१५८ कमेरनिषेधः* लक्ष्म्याः कामुको हरिः। अव्ययम्-जगत्सृष्ट्वा। सुखं कर्तुम्। निष्ठा-विष्णुना हता दैत्याः। दैत्यान् हतवान्विष्णुः। खलर्थः-ईषत्करः प्रपञ्चो हरिणा। 'तृन्' इति प्रत्याहारः, 'शतृशानचौ' इति तृशब्दादारभ्य आ तृनो नकारात्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

angotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foun

शानन्-सोमं पवमानः। चानश्-आत्मानं मण्डयमानः। शतृ-वेदमधीयन्। तृन्-कर्ता लोकान्। *१५९ द्विषः शतुर्वा*। मुरस्य-मुरं वा द्विषन्। सर्वोऽयं कारकषष्ठ्याः प्रतिषेधः। शेषे षष्ठी तु स्यादेव। ब्राह्मणस्य कुर्वन्। नरकस्य जिष्णुः।

६२९। अकेनोर्भविष्यदाधमर्ण्ययोः २।३।७०।

भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थेनञ्श्च योगे षष्ठी न स्यात्। सतः पालकोऽवतरति। व्रजं गामी। शतं दायी।

६३०। कृत्यानां कर्तरि वा २।३।७१।

षष्ठी वा स्यात्। मया मम वा सेव्यो हरिः। 'कर्तरि' इति किम्? गेयो माणवकः सामाम् 'भाव्यगेय-' (सू. २८९४) इति कर्तरि यद्विधानादनभिहितं कर्म। अत्र योगो विभज्यते। 'कृत्यानाम्'। 'उभयप्राप्तौ' इति 'न' इति चानुवर्तते। तेन नेतव्या व्रजं गावः कृष्णेन। ततः 'कर्तरि वा'। उक्तोऽर्थः।

६३१। तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम् २।३।७२।

तुल्यार्थैर्योगे तृतीया वा स्यात् पक्षे षष्ठी। तुल्यः, सदृशः, समो वा कृष्णस्य-कृष्णेन वा। 'अतुलोपमाभ्यां' किम्? तुला, उपमा वा कृष्णस्य नास्ति।

६३२। चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः २।३।७३।

एतदर्थैर्योगे चतुर्थी वा स्यात्पक्षे षष्ठी आशिषि। आयुष्यं

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ngotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Fou

चिरञ्जीवितं कृष्णाय-कृष्णस्य वा भूयात्। एवं मद्रं, भद्रं, कुशलम्, निरामयं, सुखं, शम्, अर्थः, प्रयोजनं, हितं, पथ्यं वा भूयात्। 'आशिषि' किम्? देवदत्तस्यायुष्यमस्ति। व्याख्यानात्सर्वत्रार्थ-ग्रहणम्। मद्रभद्रयोः पर्यायत्वादन्यतरो न पठनीयः।

षष्ठी विभक्तिः।

सप्तमी विभक्तिः।

६३३। आधारोऽधिकरणम् १।४।४५।

कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञः स्यात्।

६३४। सप्तम्यधिकरणे च २।३।३६।

अधिकरणे सप्तमी स्यात्, चकाराद् दूरान्तिकार्थेभ्यः। औप-श्लेषिको वैषयिकोऽभिव्यापकश्चेत्य धारस्त्रिधा। कटे आस्ते, स्थाल्यां पचति। मोक्षे इच्छास्ति। सर्वस्मिन्नात्मास्ति। वनस्य दूरे, अन्तिके। वा। 'दूरान्तिकार्थेभ्यः-' सू. ६०६) इति विभक्तित्रयेण सह चतस्रो-ऽत्र। विभक्तयः फलिताः। *१६० क्तस्येन्विषयस्य कर्मण्युपसं-ख्यानम्*। अधीती व्याकरणे। अधीतममनेनेति विग्रहे 'इष्ठादि-भ्यश्च' (सू. १८८८) इति कर्तरीनिः। * १६१ साध्वसाधुप्रयोगे च*। साधुः कृष्णो मातरि। असाधुर्मातुले। *१६२ निमित्ता-त्कर्मयोगे*। निमित्तमिह फलम्। योगः संयोगसमवायात्मकः। 'चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्। केशेषु चमरीं हन्ति

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

सीम्नि पुष्कलको हतः ॥' हेतौ तृतीयाऽत्र प्राप्ता तन्निवारणार्थमिदम् । सीमा अण्डकोषः । पुष्कलको गन्धमृगः । 'योगविशेषे' किम् ? वेतनेन धान्यं लुनाति ।

६३५ । यस्य च भावेन भावलक्षणम् २ । ३ । ३७ ।

यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी स्यात् । गोषु दुह्यमानासु गतः । *१६३ अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च* । सत्सु तरत्सु असन्त आसते । असत्सु तिष्ठत्सु सन्तस्तरन्ति । सत्सु तिष्ठत्सु असन्तस्तरन्ति । असत्सु तरत्सु सन्तस्तिष्ठन्ति ।

६३६ । षष्ठी चानादरे २ । ३ । ३८ ।

अनादराधिक्ये भावलक्षणे षष्ठीसप्तम्यौ स्तः । रुदति रुदतो वा प्राव्राजीत् । रुदन्तं पुत्रादिकमनादृत्य संन्यस्तवानित्यर्थः ।

६३७ । स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूतैश्च २ । ३ । ३९ ।

एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः । षष्ठ्यामेव प्राप्तायां पाक्षिकसप्तम्यर्थं वचनम् । गवां-गोषु वा स्वामी । गवां-गोषु वा प्रसूतः गा एवानुभवितुं जात इत्यर्थः ।

६३८ । अयुक्तकुशलाभ्यां चासेवायाम् २ । ३ । ४० ।

आभ्यां योगे षष्ठीसप्तम्यौ स्तस्तात्पर्यऽर्थे । आयुक्तो व्यापारितः । आयुक्तः—कुशलो वा हरिपूजने—हरिपूजनस्य वा

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foun

'आसेवायाम्' किम् ? आयुक्तो गौः शकटे। इषद्युक्त इत्यर्थः।

६३९। यतश्च निर्धारणम् २ | ३ | ४१ |

जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ स्तः। नृणां-नृषु वा ब्राह्मणः श्रेष्ठः। गवां-गोषु वा कृष्णा बहुक्षीरा। गच्छतां-गच्छत्सु वा धावञ्छीघ्रः। छात्राणां छात्रेषु वा मैत्रः पटुः।

६४०। पञ्चमी विभक्ते २ | ३ | ४२ |

विभागो विभक्तम्। निर्धार्यमाणस्य यत्र भेद एव तत्र पञ्चमी स्यात्। माथुराः पाटलिपुत्रकेभ्य आढ्यतराः।

६४७। साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः २ | ३ | ४३ |

आभ्यां योगे सप्तमी स्यादर्चायाम्, न तु प्रतेः प्रयोगे। मातरि साधुः, निपुणो वा। 'अर्चायाम्' किम् ? निपुणो राज्ञो भृत्यः। इह तत्त्वकथने तात्पर्यम्। *१६४ अप्रत्यादिभिरिति वक्तव्यम्*। साधुः, निपुणो वा मातरं प्रति, परि, अनु वा।

६४२। प्रसितोत्सुकाभ्यां तृतीया च २ | ३ | ४४ |

आभ्यां योगे तृतीया स्याच्चात्सप्तमी। प्रसित उत्सुको वा हरिणा-हरौ वा।

६४३। नक्षत्रे च लुपि २ | ३ | ४५ |

नक्षत्रे प्रकृत्यर्थे यो लुप्संज्ञया लुप्यमानस्य प्रत्ययस्यार्थस्तत्र

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

angotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foun

वर्तमानात्तृतीयासप्तम्यौ स्तोऽधिकरणे। 'मूलेनावाहयेद् देवीं श्रवणेन विसर्जयेत्'। मूले श्रवणे इति वा। 'लुपि' किम्? पुष्ये शनिः।

६४४। सप्तमीपञ्चम्यौ कारकमध्ये २।३।७।

शक्तिद्वयमध्ये यौ कालाध्वानौ ताभ्यामेते स्तः। अद्य भुक्त्वाऽयं द्व्यहे-द्व्यहाद्वा भोक्ता। कर्तृशक्त्योर्मध्येऽयं कालः। इहस्थोऽयं क्रोशे-क्रोशाद्वा लक्ष्यं विध्येत्। कर्तृकर्मशक्त्योर्मध्येऽयं कालः। इहस्थोऽयं क्रोशे-क्रोशाद्वा लक्ष्यं विध्येत्। कर्तृकर्मशक्त्योर्मध्येऽयंदेशः। अधिकशब्देन योगे सप्तमीपञ्चम्यावि-ष्येते, 'तदस्मिन्नधिकम्-(सू. १८४६) इति 'यस्मादधिकम्'-(सू ६४६) इति च सूत्रनिर्देशात्। लोके-लोकाद्वा अधिको हरिः।

६४५। अधिरीश्वरे १।४।९७।

स्वस्वामिसम्बन्धे अधिः कर्मप्रवचनीयसंज्ञः स्यात्।

६४६। यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी २।३।९।

अत्र कर्मप्रवचनीययुक्ते सप्तमी स्यात्। उप परार्धे हरेर्गुणाः। परार्धादधिका इत्यर्थः। ऐश्वर्ये तु स्वस्वामिभ्यां पर्यायेण सप्तमी. अधि भुवि रामः-अधि रामे भूः। 'सप्तमी शौण्डैः' (सू. ७१८) इति समासपक्षे तु 'समाधीना'। 'अक्षदक्ष'-(सू. २०७९) इत्यादिना खः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

६४७। विभाषा कृञि १ | ४ | ९८ |

अधिः करोतौ प्राक्संज्ञो वा स्यादीश्वरेऽर्थे। यदत्र मामधिकरिष्यति। विनियोक्ष्यत इत्यर्थः। इह विनियोक्तुरीश्वरत्वं गम्यते। अगतित्वत् 'तिङि चोदात्तवति' (सू. ३९७८) इति निघातो न।

सप्तमी विभक्तिः।

कारकप्रकरणम्।

———

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

अध्यापक-श्रीहरिपददत्तेन

विरचिता

कारककारिका

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

प्रसङ्गतः

ज्येष्ठे मया कृतो ग्रन्थो भग्नी खुकी तदावदत् ।
किमिदं लिखसि भ्रातः पुस्तकं किं भविष्यति ॥
अद्य भाद्रे स मे ग्रन्थो याति लोके प्रकाशताम् ।
भग्नी खुकीं गता लोकाद् * दूराद् भग्नी प्रसीदतु ॥

हृदयं मे स्थितं शून्यं न कर्मणि मनो मम ।
जीवामि मृतवत् लोके स्थातव्यं स्थीयते ततः ॥
इहायाति कथं जीवः कथं जीवश्च गच्छति ।
केयं लीला कथं लीला कस्य वैतत् प्रयोजनम् ॥

कैशोरे मे मृता माता न जानामि हि मातरम् ।
गतः पिता ततः पश्चात् न मे तदा वयो बहु ॥
अद्य तु वयसि प्राप्ते पश्यामि मरणं गृहे ।
कथं जन्म कथं मृत्युः किमिदं जीवनं भुवि ॥

तथापि क्रियते कर्म न जानामि कथं पुनः ।
नश्येत् सर्व्वं पुनः काले गच्छेत् सर्व्वं गतौ मम ॥
कारिका या कृता सापि काले गच्छेदसंशयम् ।
अकाले तथापि तस्या नाशमहं न कामये ॥

* खुकी—नामान्तरं प्रतिभा—मृत्युः आषाढः २८, १८९५ (शकाब्दः)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

ततः प्रकाशितो ग्रन्थश्चरतु स महीतले ।
रुचिर्यस्य स गृह्णातु न यस्य स जहातु च ॥
गृहीता वाक् मया लोकात् पुनर्लोकं प्रयातु सा ।
गृहीता तु मया दत्ता मुक्तो दायादपैमि च ॥

इतस्ततः स्फुटं पुष्पं कवेः काव्यं च मालिका ।
चिनोति स रुचिर्यस्य तनोति स क्षमो हि यः ॥
शुष्यति च दिनान् माला सूत्रं श्लथं भवेत् क्रमात् ।
अन्ते शून्यं स्थितं तस्याः कविर्मूढः पलायते ॥

शनिवारः, सन्ध्या (दं ३१)
भाद्रः २२,
१८९५ (शकाब्दः)

श्रीहरिपददत्तः
रामपुरहाटः
बीरभूमः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

श्रीहरिपदेदत्तविरचिता

कारककारिका

प्रथमा विभक्तिः

५३३ । प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा । २ । ३ । ४६

स्यात् प्रातिपदिकं सत्ता तदर्थे प्रथमा भवेत् ।
कृष्णः श्रीश्च तथा ज्ञानमुच्चैर्नीचैरुदाहृतिः ॥
लिङ्गे च नियते ज्ञेयमाद्यं त्रिकं निदर्शनम् ।
अन्त्यं द्विकमलिङ्गे स्यान्निदर्शनं ततः पुनः ॥
कृष्णः पुंसि स्त्रियां श्रीश्च ज्ञानं नित्यं नपुंसके ।
लिङ्गश्च नियतं तेषां व्यतिक्रमो न दृश्यते ॥
उच्चैर्नीचैर्निपाते स्तो न लिङ्गं दृश्यते तयोः ।
अलिङ्गं नियतलिङ्गं द्वयं मया प्रदर्शितम् ॥
तटस्तटी तटं स्याच्च लिङ्गमात्रे निदर्शनम् ।
अथिकं गम्यते लिङ्गं तटे वृत्तिं विहाय च ॥
'द्रोणो व्रीहि'रित्यत्र स्यात् परिमाणं विवक्षितम् ।
'द्रोणा'त् परं 'सु'ना बोध्यं परिमाणं निदर्शने ॥
इह तु प्रकृतौ द्रोणे प्रत्ययार्थो विशेषणम् ।
अभेदस्तत्र संसर्गस्तेन व्रीहिर्विशिष्यते ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

'अनभिहित' इत्येवमधिकारः प्रवर्त्तते ।
अभिहिते ततः कार्य्यं न प्राप्नोति कथञ्चन ॥
एको द्वौ वहवश्चात्र सर्व्वमभिहितं भवेत् !
तत् कथं प्रथमा तत्र पृच्छ्येयं स्यात् सुदुस्तरा ॥
'वचन' च धृतं सूत्रे ततश्च मुनिना खलु ।
प्रथमा वचने ज्ञेया समाधानं तथा भवेत् ॥

५३४ । सम्बोधने च । २ । ३ । ४७

'प्रातिपदिक'—सूत्रे तु सम्बोधनं न लक्षितम् ।
तत् कथं प्रथमा सिध्येत् सम्बोधन इति स्थितिः ॥
अधिको विद्यते चार्थः सम्बोधने सतां मते ।
तदर्थं च पुनः सूत्रमिह प्रकुरुते मुनिः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

द्वितीया विभक्तिः

५३५ । कारके । १ | ३ | २३

अधिकारे भवेत् सूत्रं 'कारके' च विशेषतः ।
इतः परं यदुक्तं स्यात् तत् कारके भवेदिह ॥

५३६ । कर्त्तुरीप्सिततमं कर्म । १ | ४ | ४९

यत् कर्त्तुः क्रियया प्राप्तुमिष्टतमं पुनर्मतम् ।
तत् कारकं भवेत् कर्म करोति स कटं यथा ॥
माषेष्वश्वं स बध्नाति माषस्य स्यान्न कर्मता ।
कर्मण इप्सिता माषा न तु कर्त्तुरिति स्थितिः ॥
स पयसोदनं भुङ्क्ते पयसोऽपि न कर्मता ।
ईप्सितं स्यात् पयो नूनं न तदिष्टतमं खलु ॥
'आधार'श्च तथा 'कर्म' द्वयमेवानुवर्त्तते ।
आधारः स्यात्तदा कर्म यदेप्सिततमं भवेत् ॥
गेहं प्रविशतीत्यादौ कर्म भवेत् तथा सति ।
ओदनं पचतीत्यादौ न स्यात् कर्म यथोचितम् ॥
इयं दशा यथा न स्यात् तथा मुनिर्विचेष्टते ।
स्मृत्वा 'कर्म' पुनः सूत्रे वारयत्यनुवर्त्तनम् ॥
अतीतेन न सम्बन्धो भिन्नं वस्तु प्रवर्त्तते ।
इष्टतमं भवेत् कर्म क्रियया क्षिप्यते यदि ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

angotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foun

५३७। अनभिहिते। २।३।१

स्या'दनभिहिते' सूत्रमधिकारे विवक्षितम्।
इतः परं सर्व्वत्र स्यादधिकारः प्रतिष्ठितः॥
उक्तं न चेत् समासेन तद्धितेन तिङा कृता।
तदा तत्र विभक्तिः स्यादधिकारो भवेदयम्।

५३८। कर्मणि द्वितीया। २।३।२

स्यात् कर्मणि द्वितीयेति मुनिना सूत्रितं पुनः।
करोति स कटं तत्र द्वितीयायां निदर्शनम्॥

वार्त्तिकम्

"उभसर्व्वतसोः कार्य्या धिगुपर्य्यादिषु त्रिषु।
द्वितीयाऽम्रेड़ितान्तेषु ततोऽन्यत्रापि दृश्यते॥"

निदर्शनं भवेदत्र ग्राममुभयतो यथा।
ग्रामं च सर्व्वतः स्याच्च निदर्शनं तथा पुनः।
धिक् पापिनं भवेदत्र निदर्शनं तथापरम्।
सर्वत्रैवं द्वितीया स्याद्वहनीयं यथायथम्॥

अभितः परितः समया निकषा हाप्रतियोगेषु च दृश्यते (वा)।

स्याद्ग्रामं परितस्तत्र निकषा समया तथा।
अभितश्च द्वितीयायां सर्व्वत्रैवं स्थितं खलु॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

५३९ । तथायुक्तं चानीप्सितम् । १ । ४ । ५०

यथेप्सिततमं वस्तु क्रियया चावगाह्यते ।
तथैव क्रियया यत्र युज्यते सदनीप्सितम् ॥
अनीप्सिते च तत्रापि भवेत् कर्म हि कारकम् ।
अन्नं खादन्‌ विषं भुङ्क्ते भवेदिह निदर्शनम् ॥

५४० । अकथितञ्च । १ । ४ । ५१

अपादानादिभिर्यत् स्यादकथितं विशेषतः ।
तदपि च भवेत् कर्म गौणं कर्म तदुच्यते ॥

द्वादशानां दुहादीनां कर्मणा यत् प्रयुज्यते ।
तत् स्यादकथितं कर्म गौणं कर्म भवेच्च तत् ॥
दोग्धिश्च याचतेस्तद्वद् दण्डयतिस्तथैव च ।
पचतिश्च रुणद्धिश्च चिनोतिः पृच्छतिस्तथा ॥
मथ्नातिर्मुष्णातिर्ब्रूतेः शास्तिश्च जयतिस्तथा ।
द्वादशानां दुहादीनां समुद्देशः कृतो मया ॥
यस्यचित् कस्यचिदेषां कर्मणा यद् युतं भवेत् ।
अकथितं भवेच्च तत् तच्च कर्म्म प्रकीर्त्तितम् ॥
दण्डयति शतं गर्गान् व्रजमवरुणद्धि गाम् ।
बालं पृच्छति पन्थानं दोग्धि गाश्च पयो नरः ॥
वृक्षं चिनोति पुष्पानि याचते वसुधां बलिम् ।
ब्रूते धर्म्मं गुरुः शिष्यं शास्ति धर्मं तथा भवेत् ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

मुष्णाति च शतं चैत्रं मथ्नाति सागरं सुधाम् ।
पचति तण्डुलानन्नं जयति च शतं हरिम् ॥
नयतिर्हरतिस्तद्वत् कर्षतिर्वहतिः पुनः ।
चत्वारस्ते समाख्याताः कथयामि निदर्शनम् ॥
नयति गां गृहं गोपो भारं वहति वाहकः ।
प्राममजां हरत्येषा कर्षति युवतिं गृहम् ॥

अकर्मकधातुभिर्योगे देशः कालो भावो
गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम् (वा) ।

अकर्मकं भवेत् कर्म देशः कालः पथः क्रिया ।
क्रियया लक्षितः कालः परिमाणं पयेन च ॥
कुल्न् स्वपिति सा वाला क्रोशमास्ते मुनिर्वने ।
प्रार्थी गोदोहमास्ते स क्रोशमास्ते स आतुरः ॥

५४१ । गति बुद्धि-प्रत्यवसानार्थ-शब्दकर्माकर्मकानामनिकर्त्ता स नौ । १ । ४ । ५२

गतौ बुद्धौ स्थितो धातुर्भोजने शब्दने स्थितः ।
स्थितश्चाकर्मको धातुर्व्वाच्यान्तरं पुनः स्थितम् ॥
अंगिजन्तदशायां य आसीत् कर्त्ता प्रयोगतः ।
स णिजन्तदशायां स्यात् कर्मेति कारकं पुनः ॥
शत्रुनगमयत् स्वर्गं वेदार्थं स्वानवेदयत् ।
आशयच्चामृतं देवान् वेदमध्यापयद्विधिम् ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

आसयत् सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः ।
प्रदर्शितमिदं पूर्व्वैर्मया पुनः प्रदर्श्यते ॥

नीवह्योर्न (वा) ।

नीवह्योः कर्मता न स्यादिति तु वार्त्तिकं पुनः ।
नाययति स भृत्येन भारमिति भवेदिह ॥

नियन्तृकर्त्तृकस्य वहेरनिषेधः (वा)

नियन्तृकर्त्तृकं यत्र वहनं सम्मतं भवेत् ।
निषेधस्तत्र न ग्राह्यस्तस्य निदर्शनं शृणु ॥
वाहा रथं वहन्तीति शिचः पूर्व्वं प्रदर्शितम् ।
वाहयति सुतो वाहान् रथमिति च कर्मता ॥

आदिखाद्योर्न (वा) ।

न कर्मताऽदिखाद्योः स्यान् निदर्शनं ततो भवेत् ।
खादयति भिषग् भक्तं वटुनेति न कर्मता ॥

भक्षेरहिंसार्थस्य न (वा) ।

न हिंसा चेत् न कर्म स्यान् निदर्शनं ततो भवेत् ।
भक्षयति भिषग् भक्तं वटुनेति न कर्मता ॥
न निषिद्धं पुनः कर्म यदि हिंसा प्रतीयते ।
भक्षयति वलीवर्द्दान् शस्यं क्षेत्र इति स्थितिः ॥

जल्पतिप्रभृतीनामुपसंख्यानम् (वा) ।

जल्पतिप्रभृतीनाञ्च वक्तव्यमिह कर्मता ।
जल्पयति पिता पुत्रं धर्ममिति निदर्शनम् ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

दृशेर्व्वा (वा)।

पुनर्दृशेः प्रयोगे स्यात् कर्त्तुरिह च कर्मता।
दर्शयति हरिर्भक्तान् भवेदिह निदर्शनम् ॥
बुद्धिस्तु ज्ञानसामान्यं तथा सूत्रात् प्रतीयते।
विशेषे कर्मता नास्ति स्मारयति तया यथा ॥

शब्दायतेर्न (वा)

शब्दायतेः प्रयोगे न कर्मता सम्मता पुनः।
शब्दाययति रामेन करणं स्याद् यथोचितम् ॥
धातौ हि निहितं कर्म ततो धातुरकर्मकः।
अकर्मक इति प्राप्ता सूत्रेनेह च कर्मता ॥
वार्त्तिकं क्रियते तत्र कर्मता न भवेदिति।
अन्यथा तु यथासूत्रं कर्मैव सुलभं भवेत् ॥

५४२। हृक्रोरन्यतरस्याम्। १।४।५३

हृक्रोरणौ स्थितः कर्त्ता णौ वा कर्म पुनर्मतम्।
भृत्येन वा तथा भृत्यं हारयति कटं हरिः ॥

अभिवादि-दृशोरात्मनेपाद् वा (वा)

अभिवादि-दृशोः कर्म यदि स्यादात्मनेपदम्।
भक्तेन वा तथा भक्तं दर्शयते देवं गुरुः ॥

५४३। अधि-शीङ्-स्थासां कर्म। १।४।४६

शीङ्-स्था-सामधिपूर्व्वात् स्यात् प्रयोगो वाक्यतो यदि।
आधारः स्यात्तदा कर्म निदर्शनं यथाग्रतः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

अधिशेते हरिः शय्यां भवेदिह निदर्शनम् ।
अधितिष्ठति तद्वत् स्यादध्यास्ते च तथा पुनः ॥

५४४ । अभिनिविशश्च १ । ४ । ४७
'अभि'-'नी'ति द्वयं यत्र विशतेः पूर्वतो भवेत् ।
आधारे विशतेस्तत्र कर्म भवति कारकम् ॥
अभिनिविशते ग्रामं दर्शितं काशिकाकृता ।
आधारः स्यादिह ग्राम आधारे कर्मता मता ॥
कल्याणोऽभिनिवेश इति कथं प्रयुज्यते ।
मण्डूकप्लुतिरित्यत्र न्यायः कश्चित् प्रवर्त्तते ॥
तेन "वान्यतरस्यां" स्यादिहापि विधृतं खलु ।
व्यवस्थितविभाषा च तत आश्रीयते पुनः ॥

५४५ । उपान्वध्याङ्वसः १ । ४ । ४८
उपान्वध्याङ्वसस्तद्वदाधारस्य च कर्मता ।
स उपवसति ग्रामं भवेदिह निदर्शनम् ॥

अभुक्त्यर्थस्य न (वा)
अनशनं यदार्थः स्यान् न तदा स्यात्तथा पुनः ।
स उपवसति ग्रामे विनाहारं स तिष्ठति ॥

५४६ । अन्तरान्तरेण युक्ते २ । ३ । ४
अन्तरेन तथान्तरा यदा तत्र प्रयुज्यते ।
तदा मता द्वितीया च निदर्शनं प्रदीयते ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

अन्तरा त्वां च मां च स्यात् कमण्डलुरिति स्थितिः ।
ऊहनीयं पुनः शास्त्रान्निदर्शनं तथा परम् ॥

५४७। कर्मप्रवचनीयाः १ | ४ | ८३

स्थिते वदति तदर्थं वदति न स्थितेऽपि यः ।
कर्मप्रवचनीयः स यथानुः स्याद् यथा परिः ॥
जपमनु निशम्येति शमिक्रिया स्थिता खलु ।
निशमनं तदर्थः स्यात्तमनुर्द्योतते पुनः ॥
"जपमनु" केवलं चेन् न "निशम्य" स्थितं यदा ।
तथापि च तमेवार्थमनुः प्राह यथायथम् ॥
क्रिया प्राप्ता क्रिया लुप्ता स्थितस्त्वर्थो यथा स्थितः ।
न म्रियते मृते चान्ये स्थाणुरनुर्व्विराजते ॥
स कर्म प्रोक्तवानादौ स कर्म प्रोक्तवान् परम् ।
कर्मप्रवचनीयः सः स्वार्थे संज्ञा प्रतिष्ठिता ॥
कर्मप्रवचनीयोऽयं तत् स्वरूपं प्रदर्शितम् ।
अन्यद् यत् स्वरूपं तस्य हरिणा तद् विशेषितम् ॥
"क्रियाया द्योतको नायं सम्बन्धस्य न वाचकः ।
नापि क्रियान्तराक्षेपी सम्बन्धस्य तु भेदकः ॥"
'क्रियाया द्योतको नायं' यथानुभूयते सुखम् ।
'सन्धन्दस्य न वाचकः' कथितं तद् द्वितीयया ॥
'नापि क्रियान्तराक्षेपी' विपरिलिखतीति वत् ।
'सम्बन्धस्य तु भेदकः' हेतुभावः स्थितो यतः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

५४८। अनुर्लक्षणे। १।८।८४

अनुश्च लक्षणे द्योत्ये तत्संज्ञको भवेदिह।
अगस्त्यमन्वसिञ्चन् स्याद् हेतुभावे निदर्शनम्॥
'लक्षणे'ति परे सूत्रं तेनानुश्च तथा भवेत्।
तत् कथं सूत्रितं पूर्व्वं किमुद्दिश्य च सूत्रितम्॥
'हेतौ' इति भवेत् सूत्रं तत्र परं प्रवर्त्तते।
पूर्व्वात् परो वलीयः स्यात् 'हेता'विति तदा लगेत्॥
तृतीया न यथा हेतौ तथा सूत्रं विधीयते।
कर्मप्रवचनीयः स्यात् सूत्रे नानुर्व्विशेषतः॥

५४९। कर्मप्रवचनीययुक्ते द्वितीया। २।३।८

कर्मप्रवचनीयैः स्याद्वितीयेति मतं पुनः।
अगस्त्यमन्वसिञ्चत् स्यात् पुनरत्र निदर्शनम्॥

५५०। तृतीयार्थे १।४।८५

तृतीयार्थे तथा चानुस्तत् संज्ञको भवेत् पुनः।
स्यादन्ववसिता सेना नदीभिति निदर्शनम्॥

५५१। हीने १।४।८६

हीने द्योत्ये तथैवानुः पूर्व्ववल् लभते गतिम्।
अनु हरिं सुरास्तत्र प्रदर्शितं निदर्शनम्॥

५५२। उपोऽधिके च। १।४।८७

अधिके च तथा हीने भवेदुपस्तथैव च।
दर्शितमुपगार्य्यां च द्रोण इति निदर्शनम्॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

५५३। लक्षणेत्थंभूताख्यानभागवीप्सासु
प्रतिपर्य्यनवः १ | ४ | ९०
लक्षणो विषयो यत्र प्रतिपर्य्यनवस्तथा ।
विद्योतते तरुं प्रति विद्य दिति निदर्शनम् ॥
इत्थम्भूतप्रकारश्चेत् प्रतिपर्य्यनवस्तथा ।
भक्तो विष्णुं प्रतीति स्यात् पुनरिह निदर्शनम् ॥
भागेऽपि च तथैव स्यात् प्रतिपर्य्यनवो यदि ।
लक्षीहरिं प्रतीति स्याद् हरेर्भागे भवेद् यदा ॥
वीप्सायामपि तद्वत् स्याद् वृक्षं वृक्षं प्रतीति च ।
निदर्शनं यथायोग्यं शेषानां कल्पयेत् सुधीः ॥

५५४। अभिरभागे। १ | ४ | ९१
भागवर्ज्जं पुनः शेषे भवेदधिस्तथैव च ।
भक्तो हरिमभीति स्यात् पुनरिह निदर्शनम् ॥
यदि भागो न तथा स्यान् न हि संज्ञा तथा भवेत् ।
मामभि स्याद् यथा किञ्चित् तद्दीयतां यथा भवेत् ॥

५५५। अधिपरी अनर्थकौ। १ | ४ | ९३
अधिपरी तथाभूतौ न चेदर्थान्तरं पुनः ।
अध्यागच्छति कस्मात् स्यादधिरनर्थको मतः ॥
गतिसंज्ञा न यथा स्यात् तथा सूत्रं प्रयोजनम् ।
गतिर्नेति निघातो न स्वरे भेदो निराकृतः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

५५६। सुः पूजायाम्। १।४।९४

सुः पूजायां तथैव स्यात् सु सिक्तं स्यात् पुनर्यथा।
क्षेपे न स्यात्तथाभावः सुषिक्तं किं तवात्र च॥
उपसर्गे भवेत् षत्वं न चेत्तथा न चेत्तथा।
न षत्वमुपसर्गो न परे षत्वं तथा परे॥

५५७। अतिरतिक्रमणे च। १।४।९५

तथैवातिश्च पूजायां तथातिक्रमणे पुनः।
अतिदेवानयं कृष्णः स्यादतिक्रमणे तथा॥

५५८। अपिः पदार्थसम्भावनान्ववसर्गगर्हा—
समुच्चयेषु। १।४।९६

अर्थे पदस्य गम्यस्य तथा सम्भावने पुनः।
तथैवान्ववसर्गे च गर्हायाञ्च समुच्चये॥
कर्मप्रवचनीयः स्यादपिरिति मतं मुनेः।
निदर्शनं यथायोग्यं तत्र मया प्रदीयते॥
पदार्थे सर्पिषोऽपि स्यात् स्मृतमिह निदर्शनम्।
अपिश्च द्योतते विन्दुंस्ततस्तत्संज्ञको भवेत्॥
वचनं "सर्पिषोऽपि स्यात्" संलापे वर्त्तते पुनः।
"अस्ति सर्पि"रिति प्रोक्ते "नास्ति सर्पि"र्वचो भवेत्॥
तत्रैव "सर्पिषोऽपि स्यात्" वचनं क्रियते पुनः।
तत्र संप्रत्ययो वक्तुर्विन्दुरपि स्थितो भवेत्॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

इह सम्भावनायां लिङ् दर्शिता कौमुदीकृता ।
तस्याः सम्भावनायाश्च भवनं विषयो भवेत् ॥
प्रथमं कर्त्तृदौर्ल्लभ्यं दौर्ल्लभ्यं भवने ततः ।
द्योतयति यथापिः सस्तथाहं कथयामि ते ॥
अपिना द्योतितो विन्दुर्व्विन्दुना स्वल्पता भवेत् ।
स्वल्पतया च दौर्ल्लभ्यं दौर्ल्लभ्यमपिना ततः ॥
कर्त्ता 'विन्दुः' क्रिया च 'स्यात्' स्यादिति भवनं पुनः ।
कर्त्ता चेद् दुर्ल्लभस्तत्र भवनं स्यात् सुदुर्ल्लभम् ॥
तस्याः सम्भावनायाश्च विषये भवने ततः ।
कर्त्तृदौर्ल्लभ्यमादाय दौर्ल्लभ्यं स ददात्यपिः ॥

५५९ । कालाध्वनोरत्यन्तसंयोगे २ । ३ । ५
द्वितीयात्यन्तसंयोगे कालाध्वनोरिति स्थितिः ।
संवत्सरमधीते स्यात् क्रोशं गिरिस्तथा पुनः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

तृतीया विभक्तिः

५६०। स्वतन्त्रः कर्त्ता। १।४।५४

क्रियासिद्धौ प्रधानो यो यो वा तथा प्रदर्शितः।
स कर्त्ता कीर्त्तितः शास्त्रे मुख्यो गौणो भवेच्च सः॥
मुख्ये पचति चैत्रः स्याच्चैत्रो मुख्यो विनिश्चितः।
स्थाली पचति गौणे स्यात् प्राधान्यं वक्तुरिच्छया॥

५६१। साधकतमं करणम्। १।४।४२

क्रियासिद्धौ प्रकृष्टं यत् कथितमुपकारकम्।
तदिह करणं ज्ञेयं पश्यति चक्षुषा यथा॥

साधकतममित्यत्र मुनिना पठितं तमप्।
प्रवृत्तिः स्याद् यथा मुख्ये तथा मुनि विचेष्टते।
न पठितं तमव् यत्र न यत्र नियमः क्वचित्।
स्यान् मुख्ये स्यात् तथा गौणे युज्यते यत्र यद् यदा॥

अस्ति शास्त्रे पुनर्न्यायो गौणमुख्यः स कीर्तितः।
एतत् सूत्रं विना न्यायो न कुत्रापि प्रवर्त्तते॥
ज्ञापकं स्यादिदं सूत्रं ज्ञापयति तथा मुनिः।
गृहाण तमपा मुख्यं गौणं मुख्यं विना तमप्॥
साधकतममित्यत्र मुनिना विधृतं तमप्।
मुख्यं ततो भवेद् ग्राह्यं मुख्ये हि 'चक्षुषा' मतम्॥
'आधार' इति सूत्रे तु न तमव् मुनिना धृतम्।
मुख्यं गौणं द्वयं ग्राह्यमेकतरे न हि स्थितिः॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

"गङ्गायां घोष" इत्यत्र गौणाधारः समर्थितः ।
न पठितं तमप् तत्र गौणेऽपि कारकं भवेत् ॥
यद्यपि स्यान् मितं वाच्यं तथापि भाषितं बहु ।
कस्यचिद् विस्तरे वाञ्छा स्वल्पे मिते च कस्यचित् ।

५६२ । कर्त्तृकरणयोस्तृतीया । २ । ३ । १८
कर्त्तृकरणयोस्तत्र तृतीया स्यात् सतां मते ।
देवदत्तेन भुक्तं स्यात् कुठारेण लुनाति च ॥

तृतीयाविधाने प्रकृत्यादीनामुपसंख्यानम् (वा)

तृतीया स्यात् प्रकृत्यादौ प्रकृत्या शीतलं पयः ।
प्रकृत्या चारु ज्ञेयञ्च प्रायेन याज्ञिकस्तथा ॥
गार्ग्यो गोत्रेन तद्वत् स्याद् विषमेन च धावति ।
पञ्चकेन पशुः क्रीतः स्यादत्र च निदर्शनम् ॥

५६३ । दिवः कर्म च । १ । ४ । ४३
यत् साधकतमं ज्ञातं करणं तत् प्रकीर्त्तितम् ।
दिवश्चेत् तद् भवेत् कर्म करणं च "च"कारतः ॥
अक्षान् दीव्यति विज्ञेयं काशिकायां निदर्शनम् ।
अक्षैर्दीव्यति चापि स्यात् कारकं करणं तदा ॥

५६४ । अपवर्गे तृतीया । २ । ३ । ६
अपवर्गे तृतीया स्यात् कालाध्वनोरिति स्थितिः ।
अपवर्गः क्रियाशेषे फलप्राप्तिरुदीरितः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

व्याकरणमधीतं हि मासेन स्यान्निदर्शनम् ।
व्याकरणमधीतं हि क्रोशेन स्यात् तथा पुनः ॥

५६५ । सहयुक्तेऽप्रधाने । २ । ३ । १९
सहयुक्तेऽप्रधाने च तृतीया स्यात् सतां मते ।
निदर्शनं च पुत्रेन सहागतः पिता यथा ॥

५६६ । येनाङ्गविकारः । २ । ३ । २०
स्याद् येनाङ्गविकारो हि तृतीया सम्मता ततः ।
अक्षणा काणो भवेदत्र तृतीयायां निदर्शनम् ॥
"अङ्ग"श्च समुदाये स्यादंशे "येन" मतो भवेत् ।
येनांशेन विकारः स्यात् तृतीया च ततो मता ॥

५६७ । इत्थंभूतलक्षणे । २ । ३ । २१
प्राप्तः कश्चित् प्रकारं स्यादित्थंभूतमिति स्थितिः ।
तस्य तु लक्षणं यत् स्यात्तदित्थंभूतलक्षणम् ॥
तृतीया च ततो ज्ञेया जटाभिस्तापसो यथा ।
उपाध्यायस्तथा छात्रैः काकैर्गृहं निदर्शनम् ॥

५६८ । संज्ञोऽन्यतरस्यां कर्मणि । २ । ३ । २२
संज्ञश्चान्यतरस्यां स्यात्तृतीया तु सतां मते ।
यथाप्राप्ता द्वितीया स्यादुभयत्र च कर्मणि ॥
पित्रा वा पितरं बालः संजानीते निदर्शनम् ।
मात्रा वा मातरं बालं संजानीते तथापरम् ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

५६९। हेतौ। २।३।२३

फलस्य साधने हेतौ तृतीया कीर्त्तिता बुधैः।
दर्शितं कन्यया शोको विद्यया च यशस्तथा॥
हेतुरयं भवेद् वा कः करणं किं पुनर्भवेत्।
कः पुनरनयोर्भेदः कथयामि सविस्तरम्॥
भवति विषयो हेतो द्रव्यं गुणस्तथा क्रिया।
विषयः स्यात् त्रिधा हेतो र्योवा को वा भवेदिह॥
कदाचिद् विषयो द्रव्यं दण्डेनेह यथा घटः।
विषयः स्याद् गुणो वापि धनेन हि कुलं भुवि॥
विषयः स्यात् क्रिया चापि पुण्येन दर्शनं हरेः।
द्रव्यं गुणः क्रिया चेति दर्शितो विषयस्त्रिधा॥
व्यापारो नियतो नास्ति कुचिदस्ति क्वचिन्न च।
व्यापारः स स्थितश्चाद्ये न स्थितः परयोर्द्वयोः॥
करणे विषयस्तत्र क्रिया चैका हि केवलम्।
व्यापारो नियतश्चापि न भवेदन्यथा क्वचित्॥
कुठारेण छिनत्तीति छिदिक्रिया फलं भवेत्।
उन्नमनादिकं तत्र व्यापारश्च स्थितः पुनः॥
यथा तथा भवेद्वापि न च सूक्ष्मे रुचिर्मम।
जानामि यदहं स्थूलं शृणु भ्रातर्ब्रवीमि तत्॥
व्यापारवद् यदा प्रोक्तं कारकं करणं कुरु।
व्यापारेण यदा हीनं तदा हेतुं गृहाण तम्॥
अन्वयः क्रियया यत्र तत्रैव कारकं भवेत्
अन्वयः क्रियया चेन्न हेतोरवसरस्तदा॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

चतुर्थी विभक्तिः

५७०। कर्मणा यमभिप्रैति स सम्प्रदानम्। १ | ४ | ३२

कर्मणा यमभिप्रैति सम्प्रदानं भवेद्धि तत्।
विप्राय गां ददातीति भवेदिह निदर्शनम्॥
संज्ञायां 'दा'-प्रवेशाच्च केचित् दानं प्रचक्षते।
यत्र स्याद् ददातेः कर्म तत्रैव कारकं भवेत्॥
केचिदाहुर्न तन् न्याय्यं न दानं केवलं मतम्।
क्रियामात्रमिह ग्राह्यं तेन लक्ष्यं हि सिध्यति॥
दर्शयति सुतं माता चन्द्रमिति यदा भवेत्।
तदापि कारकं सिध्येत् सम्प्रदानं च कारकम्॥
इहोपलक्षणं दानं क्रियामात्रं हि लक्षितम्।
'कर्मणे'ति मुनिः प्राह न प्राह 'दान'कर्मणा॥

५७१। चतुर्थी सम्प्रदाने। २ | ३ | १३

चतुर्थी सम्प्रदाने स्याद् गुरवे गां ददाति सः।
स्पृहयते च पुष्पेभ्यो देवदत्ताय रोचते॥

वार्त्तिकम्

१) चतुर्थी विधाने तादर्थ्ये उपसंख्यानम्।
२) कृल्पि सम्पद्यमाने चतुर्थी वक्तव्या।
३) उत्पातेन ज्ञीप्यमाने चतुर्थी वक्तव्या।
४) हितयोगे चतुर्थी वक्तव्या।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

angotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foun

क्लृपि सम्पद्यमाने च तादर्थ्ये च तथा हिते ।
उत्पातज्ञापिते चैव चतुर्थी वार्त्तिकाद्भवेत् ॥
यूपाय दारु तादर्थ्ये गोभ्यो हितं हिते युते ।
'वाताय कपिला विद्यु'दुत्पातज्ञापिते तथा ॥
स्वर्गाय कल्पते धर्मो विद्या सुखाय कल्पते ।
क्लृपि सम्पद्यमाने च निदर्शनद्वयं भवेत् ॥

५७२। रुच्यर्थानां प्रीयमाणः । १ । ४ । ३३
रुच्यर्थानां प्रयोगे स्यात् प्रीयमाणस्तथा पुनः ।
हरये रोचते भक्तिर्भवेदिह निदर्शनम् ॥
प्रीयमाणो न चेन् न स्यात् सम्प्रदानमिति स्थितिः ।
मोदको रोचते तस्मै पथीति न तथा पुनः ॥

५७३। श्लाघ-ह्नु-ङ्-स्था-शपां ज्ञीप्स्यमानः । १ । ४ । ३४
एभिर्व्वोधयितुमिष्टं सम्प्रदानं प्रकीर्त्तितम्।
कृष्णाय श्लाघते गोपी स्मरादिति निदर्शनम् ॥
शेते च तिष्ठते तद्वत् शपते च तथा भवेत् ।
ज्ञीप्स्यमानो न चेन्न स्यात् कृष्णस्य श्लाघते पथि ॥

५७४। धारेरुत्तमर्णः । १ । ४ । ३५
धारयतेः प्रयोगे स्यादुत्तमर्णस्तथा पुनः ।
धारयति हरिर्मोक्षं भक्तायेति निदर्शनम् ॥
उत्तमर्णो न चेल् लक्ष्यः सम्प्रदानं भवेन्नहि ।
धारयति शतं ग्रामे न स्याद् ग्रामे तथा पुनः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

५७५। स्पृहेरीप्सितः। १।४।३६

स्पृहयतेः प्रयोगे स्यादीप्सितोऽपि तथा पुनः।
स्पृहयति फलेभ्यः स्यान्निदर्शनं स्पृहेरिह॥
उक्तमीप्सितमात्रं चेदियं संज्ञा प्रवर्त्तते।
प्रकर्षश्चेद् भवेद् युक्तः कर्मैव कारकं भवेत्॥
स्पृहयति फलं रामः प्रकर्षे दर्शितं पुनः।
तदीप्सिततमं कर्त्तुः 'कर्म'सूत्रं ततो लगेत्॥

५७६। क्रुध-द्रुहेर्ष्यासूयार्थानां यं प्रति कोपः। १।४।३७

क्रोधे द्रोहे तथैर्ष्यायामसूयने तथा पुनः।
धातुश्चेत् वर्त्तते कश्चित् कोपपात्रं भवेत्तथा॥
क्रुध्यते हरये रामो भवेदिह निदर्शनम्।
द्रुह्यति हरये राम ईर्ष्यति चापसूयति॥
सम्प्रदानं न पुनः स्यान्न चेत् कोपः प्रतीयते।
भार्य्यामीर्ष्यति रामः स्यान्न कोपो गम्यते तथा॥
पर एनां न पश्येत् स्यादेवं हि मनसो गतिः।
न कोपविषयो भार्य्या कोपस्य विषयः परः॥
क्रोधोऽमर्षः क्षतिर्द्रोह ईर्ष्या स्यादसहिष्णुता।
गुणे दोषसमारोपः स्यादसूया सतां मते॥
सर्व्वे कोपभवा ज्ञेया सर्व्वे कोपसमुत्थिताः।
कोपस्य ग्रहणात् सूत्रे सर्व्वेषां ग्रहणं भवेत्॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

angotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foun

५७७। क्रुधद्रुहोरुपसृष्टयोः कर्म। १।४।३८
सम्प्रदाने स्थिते तत्र विशेषः कथ्यते पुनः।
उपसर्गयुतस्यास्ति क्रुधद्रुहोर्विशेषता॥
सम्प्रदानं न तदा स्यात् स्याच्च कर्म तथा सति।
अभिक्रुध्यति भृत्याय कर्मणि स्यान्निदर्शनम्॥

५७८। राधीक्षोर्यस्य विप्रश्नः। १।४।३९
सम्प्रदानं च राधीक्ष्यो विप्रश्नो गम्यते यदि।
कृष्णाय राध्यतीत्यत्र शुभाशुभं निरीक्षते॥

५७९। प्रत्याङ्भ्यां श्रुवः पूर्व्वस्य कर्त्ता।
१।४।४०
पूर्व्वादेव स्थिता याच्ञा प्रतिज्ञा च परं स्थिता।
शृणोति प्रतिपूर्व्वः स्यादाङ्पूर्व्वश्च तथा पुनः॥
याच्ञाकर्त्ता भवेदत्र सम्प्रदानमिति स्थितिः।
प्रतिशृणोति विप्राय वस्त्रमिति निदर्शनम्॥

५८०। अनुप्रतिगृणाश्च। १।४।४१
'पूर्व्वस्ये'ति स्थितं पूर्व्वात् 'कर्त्त'ति च तथा स्थितम्।
पूर्व्वाद्धि स्थिते व्यापारे पूर्व्वकर्त्ता च पूर्व्ववत्॥
अनुगृणाति होत्रे स आदौ होता हि शंशति।
प्रोत्साहयति पश्चात्तमध्वर्युरिति गम्यते॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

५८१। परिक्रयणे सम्प्रदानमन्यतरस्याम् । १ । ४ । ४४
यत् साधकतमं तत्र तत् करणं भवेदिह ।
सम्प्रदानं विभाषा तद् यदि क्रयः पुनर्मतः ॥
भृत्या नियतकालं यत् स्वीकरणं भवेदिह ।
तत् परिक्रयणं ज्ञेयं नहि चात्यन्तिकः क्रयः ॥
परिक्रीतः शतेनेति शताय वा निदर्शनम् ।
वेतनेन कियत् कालं नियोजित इति स्थितम् ॥

५८२। क्रियार्थोपपदस्य च कर्मणि स्थानिनः । २ । ३ । १४
प्रयुज्यते न धातुश्चेत्तदर्थश्चेत् प्रतीयते ।
स स्थानी कथितः शास्त्रे तमाश्रित्य विधीयते ॥
उपपदं क्रिया यत्र क्रियार्था स्यात् प्रयोगतः ।
कर्मणि स्थानिनस्तत्र चतुर्थी स्यादिति स्थितिः ॥
फलेभ्यो व्रजति स्याच्च पुनरिह निदर्शनम् ।
"आहर्त्तुं" मिति युक्तं न तथापि तत् प्रतीयते ॥
आहृङ् धातुर्भवेत् स्थानी भवेत् कर्म फलानि च ।
"आहर्त्तुं" तु क्रिया तत्र तदर्था व्रजतिक्रिया ॥
क्रिया स्थिता क्रियार्था च स्थानी धातुस्तथा स्थितः ।
कर्मण्यतश्चतुर्थी स्यात् फलेभ्यः स्यात् तथा पदम् ॥

५८३। तुमर्थाच्च भाववचनात् । २ । ३ । १५
स्याद्भाववचनात्तत्र तुमर्थाच्च तथा पुनः ।
पाकाय व्रजति स्याच्च व्रजति भूतये तथा ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

५८४। नमःस्वस्तिस्वाहास्वधालं वषड्योगाच्च ।
२ । ३ । १६

नमःस्वस्ती तथा स्वाहा स्वधा चालं वषट् पुनः ।
एभिर्योगे चतुर्थी स्यात् पाणिनये नमो यथा ॥
तथा स्वस्ति प्रजाभ्यः स्यात् स्वाहाग्नये तथा भवेत् ।
स्यात् पितृभ्यः स्वधा तद्वत् स्यादिन्द्राय वषट् तथा ॥
स्वस्ति गोभ्यस्तथा भूयात् आशीर्यत्र विवक्षिता ।
अलं मल्लो हि मल्लाय स्यादलमि निदर्शनम् ॥

५८५। मन्यकर्मण्यनादरे विभाषाऽप्राणिषु ।
२ । ३ । १७

अनादरो मतो यत्र कर्मणि मन्यते स्तदा ।
चतुर्थी विभाषा ज्ञेया प्राणिषु न तथा भवेत् ॥
न त्वा तृणाय मन्ये स्यात् तृणं मन्ये विभाषया ।
न त्वा बुसाय मन्ये स्यात् बुसं मन्ये तथैव च ॥
मन्धातोः स्याद् दिवोदीये न तथा स्याद् गणान्तरे ।
अनादरे चतुर्थी स्यान् नार्थभेदे तथा पुनः ॥
प्राणिषु न चतुर्थी स्यात् शृगालं मन्यते यथा ।

यदेतत् प्राणिष्विति तदनावादिष्विति वक्तव्यम् (वा)

नावादिषु चतुर्थी न नावं मन्ये निदर्शनम् ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

५८६। 'गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ
चेष्टायामनध्वनि। २।३।१२

गत्यर्थानां प्रचेष्टायाननध्वनि च कर्मणि।
द्वितीया सम्मता ज्ञेया चतुर्थी च तथा पुनः॥
स ग्रामं गच्छति स्याच्च ग्रामाय च निदर्शनम्।
अध्वन्यर्थो भवेद् ग्राह्यो यथा मार्गं स गच्छति॥
चतुर्थी तु तदा वाच्या यदोत्पथात् गतिः पथि।
पथे स गच्छतीत्यत्र निदर्शनं प्रदर्शितम्॥

न चतुर्थी न चेष्टा चेद् द्वितीया स्याच्च कर्मणि।
जातिस्मरो गृहं पूर्व्वं गच्छति मनसा मुदम्॥
न तु देहे परिस्पन्दः संयोगो मनसा सह।
एवन्तु प्रायशो दृष्टं जातिस्मरे सदा भुवि॥

———

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

कारककारिका

पञ्चमी विभक्तिः

५८७। ध्रुवमपाये अपादानम्। १।४।२४

अपाये यद् ध्रुवं स्यात्तदपादानं प्रकीर्त्तितम्।
ध्रुवमवधिभूतं स्यात् स्थिरं तदस्थिरं पुनः॥
'ध्रु' गतौ स्यात् तथा स्थैर्य्ये ततो ध्रुवं पदं भवेत्।
धातुना यद् द्वयं प्रोक्तं पदेऽपि तद् द्वयं स्थितम्॥
आगच्छति हरिर्ग्रामात् स्थिरे भवेन्निदर्शनम्।
धावतोऽश्वाद् हरिर्भ्रष्टः स्यादस्थिरे तथा पुनः॥

निर्द्दिष्टविषयं तत् स्यादुपात्तविषयं पुनः।
अपेक्षितक्रियं तत् स्यादपादानं त्रिधा स्थितम्॥
क्रिया स्थिता भवेदादौ भवेद्दूह्या क्रिया परे।
क्रिया शून्या भवेच् शेषे त्रिषु त्रिलक्षणं स्थितम्॥
पतति पर्व्वतात् तत्र पततीति क्रिया स्थिता।
कुसूलात् पचतीत्यादौ 'समादाय'ति गम्यते॥
'कुतो भवान्' 'मठात्' स्याच्चेदिह क्रिया न विद्यते।
कथितं तु मया स्थूलं सूक्ष्मं मया न दर्शितम्॥
स्थितो ग्रन्थः स्थिता बुद्धिः स्थाने स्थितं समाहर।
हरिणा कथितं पूर्व्वं परो हरिर्विजृम्भते॥

५८८। अपादाने पञ्चमी। २।३।२८

पञ्चमी स्यादपादाने पर्व्वतादवरोहति।
स्याद्बिभेति वृकेभ्यश्च रथाच्च पतितस्तथा॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

वार्त्तिकम्

१) पञ्चमीविधाने ल्यब्लोपे कर्मण्युपसंख्यानम् ।

२) अधिकरणे चोपसंख्यानम् ।

३) प्रश्नाख्यानयोश्च पञ्चमी वक्तव्या ।

४) यतश्चाध्वकालनिर्माणं ततः पञ्चमी वक्तव्या ।

५) तत्युक्तात् काले सप्तमी वक्तव्या ।

६) अध्वनः प्रथमा सप्तमी च वक्तव्या ।

१) ल्यबलोपे कर्मणि स्याच्च पञ्चमीति तु वार्त्तिकम् ।
प्रासादात् प्रेक्षते ज्ञेयं निदर्शनं पुनस्ततः ॥

२) स्यादधिकरणे चापि ल्यब्लोपे पञ्चमी तथा ।
आसनात् प्रेक्षते ज्ञेयं शयनात् प्रेक्षते पुनः ॥

३) यत्र प्रश्नस्तथाख्यानं मता तत्र हि पञ्चमी ।
कुतो भवानिति प्रश्ने हरिणाया भवेदिति ॥

४) यतोऽध्वा च यतः कालो मीयते पञ्चमी ततः ।
हरिणाया लटाखोला योजनैकं भवेद् यथा ॥

५) आषाढात् श्रावणे मासे काले भवेन्निदर्शनन् ।
अध्वनि च तथा काले निदर्शनं प्रदर्शितम् ॥

६) भवेत् परिमिते काले सप्तमीति मतं सताम् ।
आषाढात् श्रावणे मासे यथापूर्व्वं निदर्शनम् ॥

५८९ । भीत्रार्थानां भयहेतुः । १ । ४ । २५
भये त्राणे यदा हेतुः क्रियया स्यात् प्रदर्शितः ।
तदा हेतुरपादानं भवेदिह सतां मते ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

व्याघ्राद् जनो विभेति स्याद् व्याघ्रादुद्विजते जनः ।
चौराच्च त्रायते तद्वत् चौरात् पुनश्च रक्षति ॥

इह कथमपायः स्यादपादानं कथं स्थितम् ।
इति पृच्छा वरीवर्त्ति तदुत्तरं गृहाण मे ॥
प्राप्य बुद्ध्या निवृत्तश्चेदपायः सुस्थितः खलु ।
अपाये सुस्थिते स्थेयमपादानं तदाश्रयम् ॥
व्याघ्राद् जनो विभेतीति भवेत् पुन र्निदर्शनम् ।
व्याघ्रो वा मां निहन्तीति प्राप्य बुद्ध्या निवर्त्तते ॥

५९०। पराजेरसोढः । १ । ४ । २६
जयतेः स्यात् परापूर्वात् प्रयोगो वाक्यतो यदि ।
सोढुं शक्यं न स्याद् यत् तदपादानं प्रकीर्त्तितम् ॥
स पराजयते पाठाद् भवेदिह निदर्शनम् ।
पराजयते शत्रून् स्यान् न चेदसहनं मतम् ॥

५९१। वारणार्थानामीप्सितः । १ । ४ । २७
योगे च वारणार्थानामीप्सितः स्यात्तथा पुनः ।
वारयति यवेभ्यो गां भवतीह निदर्शनम् ॥
ईप्सितं स्यादपादानमनीप्सितं तथा न च ।
वारयति यवेभ्यो गाः क्षेत्रे इति न पञ्चमो ॥

५९२। अन्तर्द्धौ येनादर्शनमिच्छति । १ । ४ । २८
अन्तर्द्धानं स्फुटं यत्र नेच्छति दर्शनं पुनः ।
येन न दर्शनं काम्यमपादानं मतं हि तत् ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

मातुर्निलीयते कृष्णो भवेदिह निदर्शनम् ।
न मात्रा दर्शनं कृष्णः काम्यतीति पलायते ॥
अन्तर्द्धानं न चेत्तत्र न कारकं प्रयुज्यते ।
दिदृक्षते न चौरान् स नान्तर्द्धानं न पञ्चमी ॥
नेच्छति दर्शनं यत्र दर्शनं स्यात् तथापि चेत् ।
तत्रापि स्यादपादानं वृद्धान् नारी निलीयते ॥

५९३ । आख्यातोपयोगे च । १ । ४ । १९
स्यादाख्यातोपयोगेऽपि कारकं च तथाविधम् ।
यदि स्यान्नियमः कश्चिदुपाध्यायादधीतवान् ॥
नियमो यदि कश्चिन्न नापादानं तदा भवेत् ।
शृणोति स नटस्येति न नियमो न पञ्चमी ॥

५९४ । जनिकर्त्तुः पञ्चमी । १ । ४ । ३०
जायमानस्य हेतुः स्यादपादानमिति स्थितिः ।
असतो जनने सूत्रभूतस्य समुद्भवे ॥
प्रजायते पितुः पुत्रो भवेदिह निदर्शनम् ।
जायन्ते ब्रह्मणो जीवा दर्शितं च तथा पुनः ॥

५९५ । भुवः प्रभवः । १ । ४ ३१
भुवस्तु प्रभवस्तद्वदपादानं भवेदिह ।
सिद्धस्य प्रथमे ज्ञाने सूत्रमिदं प्रवर्त्तते ॥
अत्र हिमवतो गङ्गा प्रभवति निदर्शनम् ।
स्थिता गङ्गा परं ज्ञाता हिमालये प्रकाशते ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

५९६। अन्यारादितरर्त्ते दिक्शब्दाञ्चूत्तरपदाजाहियुक्ते।
२।३।२९

अन्यारादितरर्त्ते दिगाजाहितश्च पञ्चमी।
अञ्चूत्तरपदात् तद्वत् पञ्चमीति मतं सताम्॥
एतदर्थात् पदाच्चापि पञ्चमी स्यादिति स्थितिः।
अन्यो भिन्नो हरेर्ज्ञेयं पुनरिह निदर्शनम्॥
स्यादारादितरो रामादृते रामात्तथा भवेत्।
पूर्वो ग्रामाच्च दिक्शब्दादाहि ग्रामाच्च दक्षिणा॥
स्याद्दक्षिणा पुनर्ग्रामादाहिना च निदर्शनम्।
अञ्चूत्तरपदाज् ज्ञेयं प्राग् ग्रामाद् हि तथा पुनः॥

५९७। अपपरी वर्जने। १।४।८८

अपपरी तथा स्यातां वर्ज्जनं चेत् प्रतीयते।
अपहरेश्च संसारः परिहरेस्तथा भवेत्॥

५९८। आङ् मर्य्यादावचने। १।४।८९

मर्य्यादा चेद् भवेदाङ् च तत्संज्ञक इति स्थितिः।
आकुमारं यशोलोके पाणिनेः स्यान्निदर्शनम्॥
मर्य्यादाग्रहणाच्चात्र पुनरभिविधिर्मतः।
भवेदा सकलाद् ब्रह्म पुनरिह निदर्शनम्॥

५९९। पञ्चम्यपाङ्परिभिः। २।३।१०

कर्मप्रवचनीयाश्चेदपाङ्परि तथा पुनः।
पञ्चमी स्यात् सतां तत्र परिश्च वर्ज्जने धृतम्॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

वृष्टोऽपहरिणायाः स्यादपयोगे निदर्शनम् ।
वृष्ट आ हरिणायाः स्यादाङ्योगे च तथा पुनः ॥

६०० । प्रतिः प्रतिनिधि प्रतिदानयोः । १ । ४ । ९२
प्रतिः प्रतिनिधौ तद्वत् प्रतिदाने तथा प्रतिः ।
प्रद्युम्नं प्रति कृष्णः स्यात् पुनरिह निदर्शनम् ॥

६०१ । प्रतिनिधिप्रतिदाने च यस्मात् । २ । ३ । ११
प्रतिनिधिर्यतो यस्मात् प्रतिदानं च सम्मतम् ।
कर्म प्रवचनीये स्यात् तत्र च पञ्चमी सदा ॥
कृष्णं प्रति हि प्रद्युम्नो भवेदिह निदर्शनम् ।
तिलेभ्यः प्रति माषान् स यच्छति स्यात् तथा परम् ॥

६०२ । अकर्त्तर्यृणे पञ्चमी । २ । ३ । २४
पञ्चमी स्यादृणे हेतौ कर्त्तरि न तथा भवेत् ।
शताद् बद्धः सहस्राद् वा निदर्शनं भवेदिह ॥
शतेन वञ्चितो यत्र तत्र कर्त्ता प्रयोजकः ।
ततस्तत्र तृतीयैव न पञ्चमी विधीयते ॥

६०३ । विभाषा गुणेऽस्त्रियाम् । २ । ३ । २५
गुणेऽस्त्रियां विभाषा स्यात् पञ्चमीति मतं सताम् ।
जाड्याद्बद्धो भवेदत्र जाड्येन वा निदर्शनम् ।
न पञ्चमी भवेत् स्त्रियां बुद्ध्या मुक्तो यथा भवेत् ।
सर्व्वत्रैव मता हेतौ न विधिः स्यादहेतुके ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ngotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Fou

६०४। पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् । २ । ३ । ३२

पृथग् विना तथा नाना भवेदेषां विभाषया ।
तृतीयेति मनीषीनां पञ्चमी च तथा भवेत् ॥
पृथग् विना तथा नाना रामेन स्यान्निदर्शनम् ।
रामाद्रामं तथा स्याच्च योगविभाषया पुनः ॥

६०५। करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य ।
२ । ३ । ३३

स्तोकमल्पं तथा कृच्छ्रं कतिपयं तथा पुनः ।
एभ्यः पुनर्व्विभाषातः तृतीया करणे मता ॥
पक्षे स्यात् पञ्चमी तैश्च निदर्शनं च दीयते ।
स्तोकेन वा तथा स्तोकान् मुक्त इति निदर्शनम् ॥
अल्पान् मुक्तस्तथाल्पेन निदर्शनं तथा परम् ।
कृच्छ्रेन वा तथा कृच्छ्रान् मुक्तः स्याच्च परं पुनः ॥
मुक्तः कतिपयाज् ज्ञेयं मुक्तः कतिपयेन च ।
असत्त्ववचने चैतन् न सत्त्वे तु तथा भवेत् ॥
अल्पेन मधुना मत्त इति सत्त्वे निदर्शनम् ।
नित्या सत्त्वे तृतीयेति न पञ्चमी विभाषया ॥
क्रियाविशेषणं यत्र न तत्र स्यात्तु कर्मणि ।
स्तोकं मुञ्चति तत्र स्यात् स्तोकं क्रियाविशेषणम् ॥

६०६। दूरान्तिकार्थेभ्यो द्वितीया च । २ । ३ । ३५

भवेद्दूरान्तिकार्थाच्च द्वितीयाऽपि तथा पुनः ।
दूरं दूरेन दूराद्वा ग्रामाद् भवेन्निदर्शनम् ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

६१३। ज्ञोऽविदर्थस्य करणे । २ । ३ । ५१

जानाति स्यान् न चेदर्थः करणं स्याच्च कारकम् ।
करणे तत्र षष्ठी स्याद् जानीते मधुनो यथा ॥
मधुना करणेनेह प्रवर्त्तते इति स्मृतम् ।
जानातिना प्रवृत्तिः स्यात् पुनरिह विवक्षिता ॥
मिथ्याज्ञानं तदर्थो वा तथाज्ञानं पुनर्मतम् ।
मिथ्याज्ञानात् तथाज्ञानात् जन इह प्रवर्त्तते ॥

६१४। अधीगर्थदयेसां कर्मणि । २ । ३ । ५२

अधीगर्थदयेशात् स्यात् पुनः षष्ठी च कर्मणि ।
यदि तत्र विवक्षा स्याद् यदि शेषः प्रकीर्त्तितः ॥
मातुरध्येति बालः स्यादधीगर्थे निदर्शनम् ।
सर्पिषो दयते स्याच्च स्यादीष्टे च तथा पुनः ॥
न कर्म चेन् न षष्ठी स्यान् मातुर्गुणैः स्मरेद् यथा ।
न शेषश्चेन्न षष्ठी च स्मरति मातरं यथा ॥

६१५। कृञः प्रतियत्ने । २ । ३ । ५३

प्रतियत्नो गुणाधानं शेषे षष्ठी च कर्मणि ।
स्यादुपकुरुते शस्त्रं पत्रस्येति निदर्शनम् ॥

६१६। रुजार्थानां भाववचनानामज्वरेः । २ । ३ । ५४

यदि रुजा भवेदर्थो 'ज्वरि'-धातु र्न युज्यते ।
स्याद्भावकर्त्तृकानाञ्च रुजार्थानां तथा पुनः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Fo

कमणि कारके शेषे षष्ठीह स्याद् विवक्षातः ।
चौरस्य रुजति रोगो भवेदिह निदर्शनम् ॥

अज्वरि-सस्ताप्योरिति वक्तव्यम् (वा)

सन्तापेरपि योगाच्च षष्ठीह बाधिता भवेत् ।
अज्वरिणा तथा चेह सन्तापिश्च स्मृतो भवेत् ॥

६१७। आशिषि नाथः । २ । ३ । ५५
कर्मणि स्यात्तथा शेषे आशीरर्थे च नाथतेः ।
सर्पिषो नाथनं स्याच्च पुनरिह निदर्शनम् ॥
आशीरर्थो न चेत्तत्र न स्यात् षष्ठी तदा पुनः ।
नाथति स नृपं भूमिं याचते इति गम्यते ॥

६१८। जासि-निप्रहन-नाट-क्राथ-पिषां हिंसायाम् ।
२ । ३ । ५६
जासेर्निप्रहनश्चापि नाटः क्राथस्तथा पिषः ।
कर्मणि हिंसया षष्ठी यदि शेषो विक्षितः ॥
निप्रौ तत्र विपर्य्यस्तौ व्यस्तौ वा संहतौ मतौ ।
प्रणिहन् निप्रहन् स्याच्च प्रहन् निहन् तथा भवेत् ॥
उज्जासयति चौरस्य चौरस्य प्रणिहन्ति च ।
निप्रहन्ति प्रहन्त्यपि निहन्त्यपि तथा पुनः ॥
उन्नाटयति चौरस्य क्राथयति तथैव च ।
वृषलस्य पिनष्टि स्याद् यथास्मृतं निदर्शनम् ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

न चेद्धिंसा न षष्ठी स्याद् भवेत् कर्म यथाश्रुतम् ॥
पिनष्टि पुरुषो धाना अहिंसायां हि कर्मता ।

६१९ । व्यवहृपणयोः समर्थयोः । २ । ३ । ५७
व्यवहृ वर्त्तते द्यूते क्रयविक्रययोः पुनः ।
तत्र कर्मणि षष्ठी स्याद् यदि शेषो विवक्षितः ॥
व्यवहारः शतस्येति द्यूतक्रीड़ा प्रतीयते ।
प्रतीयते विकल्पेन वाणिज्यकरणं पुनः ॥
वर्त्तते च पुनर्द्यूते वाणिज्यकरणे पनः ।
तत्र कर्मणि षष्ठी स्याद् यदि शेषो विवक्षितः ॥
शतस्य पणते स्याच्च पुनस्तत्र निदर्शनम् ।
द्यूतक्रीड़ा भवेदर्थो वाणिज्यमथवा पुनः ॥
समार्थता न चेत्तत्र न षष्ठी स्यात् तदा मता ।
यथाप्राप्ता द्वितीया स्याद् ब्राह्मणं पनते हृदि ॥
इह स्तुतिः पनस्यार्थः पनः स्तुतौ प्रवर्त्तते ।
स्तवीति ब्राह्मणं हृदि भवेदर्थः समग्रतः ॥
न व्यवहृ स्तुतौ दृष्टो दृष्टः स्तुतौ पुनः पनः ।
अर्थतो न समौ तौ द्वौ नास्ति तत्र समार्थता ॥

६२० । दिवस्तदर्थस्य । २ । ३ । ५८
कर्मणि स्याद् दिवः षष्ठी द्यूत-वाणिज्ययोः पुनः ।
शतस्य दीव्यति ज्ञेयं तत्र पुनर्निदर्शनम् ॥
न वाणिज्यं न चेद् द्यूतं न षष्ठी स्याद् दिवः पुनः ।
ब्राह्मणं दीव्यतीत्यत्र स्तुतेरर्थो हि गम्यते ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

angotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foun

६२१। विभाषोपसर्गे। २।३।५९
उपसर्गाद् विभाषा स्यादपवादो भवेदयम्।
शतस्य प्रतिदीव्यति शतं वा स्यान् निदर्शनम्॥
उपसर्गो न चेत्तत्र न विभाषा प्रवर्त्तते।
नित्यं तत्र भवेत् षष्ठी शतस्येति यथाश्रुतम्॥

६२२। प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने। २।३।६१
देवता सम्प्रदानं चेद् हविश्च कर्मकारकम्।
तदा प्रेष्यब्रुवोर्योगे षष्ठी स्यादिह कर्मणि॥
निदर्शन'मिहाग्नये छागस्येति' भवेत् पुनः।
न देवता न हव्यं वा न स्यात् षष्ठी तदा पुनः॥

६२३। कृत्वोऽर्थप्रयोगे कालेऽधिकरणे। २।३।६४
कालेऽधिकरणे षष्ठी कृत्वोऽर्थानां प्रयोगतः।
द्विरह्नो भोजनं तत्र निदर्शनं प्रदर्शितम्॥
इहापि वर्त्तते शेषो न शेषश्चेद् भवेन्नहि।
द्विरहनि हरिर्भुङ्क्ते काले स्यात् सप्तमी पुनः॥

६२४। कर्त्तृकर्मणोः कृति। २।३।६५
कृत्प्रयोगे भवेत् षष्ठी कर्त्तरीह च कर्मणि।
कर्त्तरि कृतिः कृष्णस्य गवां दोहश्च कर्मणि॥
कृति खलु भवेत् षष्ठी तद्धिते न तथा भवेत्।
कृतपूर्वी कटं चेति न षष्ठी तद्धिते मता॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

६२५। उभयप्राप्तौ कर्मणि। २।३।६६

कृति चेदुभयं प्राप्तं षष्ठी कर्मणि केवलम्।
आश्रुत्यर्थो हि गवां दोहोऽगोपेनेति निदर्शनम्॥

स्त्रीप्रत्यययोरकाराकारयोर्नायं नियमः (वा)

अकश्चेत्स्यादकारो वा स्त्रीप्रत्यस्ततः परम्।
न तत्र नियमश्चायं षष्ठी भवेदुभयथा॥
भेदिका वा विभित्सा वा रुद्रस्य जगतो यथा।
रुद्रस्य जगतश्चेति षष्ठी कर्त्तरि कर्मणि॥

शेषे विभाषा (वा)

अकवर्ज्जमवर्ज्जं वा स्यादन्यः प्रत्ययो यदि।
नित्यं कर्मणि षष्ठी स्यात् कर्त्तरि तु विभाषया॥
अकवर्ज्जमवर्ज्जं वा प्रत्ययः स्याद् यथातथा।
तत्रापि गमकं लिङ्गमिति केचिच्च मन्यते॥
विचित्रा जगतः सृष्टि हरेर्व्वा हरिणा तथा।
अकवर्ज्जमवर्ज्जं च स्त्रियां क्तिनि निदर्शनम्॥
न लिङ्गं गमकं ज्ञेयमिति केचिच्च मन्यते।
अकवर्ज्जमवर्ज्जं वा प्रत्ययो गमको भवेत्॥
शिशुना पयसः पानं शिशोर्व्वेति निदर्शनम्।
अकवर्ज्जमवर्ज्जं च ल्युड्डिह गमकं मतम्॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ngotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Fou

६२६। क्तस्य च वर्त्तमाने। २ | ३ | ६७
क्तस्य च वर्त्तमाने स्मात् षष्ठीति सूत्रितं पुनः।
राज्ञां मतस्तथा बुद्धः पूजितो वा निदर्शनम्॥

६२७। अधिकरणवाचिनश्च। २ | ३ | ६८
यत्राधिकरणे क्तः स्यात् तत्र षष्ठी विधीयते।
इदमेषां गतं तत्र भवेत् पुर्ननिदर्शनम्॥

६२८। न लोकाव्ययनिष्ठाखलर्थतृणाम्। २ | ३ | ६९
लकारः स्यादुकारः स्यादुकश्च स्यात् तथाव्ययम्।
इदं सर्व्वं मिलित्वा स्याल् लोकाव्यय इति स्थितिः॥
शतृ शानच् क्वसु कानच् किं किन् ज्ञेयो लकारतः।
एतत् षट्कं लकारेण भवेद् ग्राह्यं समासतः॥
क्तः क्तवतुर्भवेत् निष्ठा खलर्थो युच् प्रकीर्त्तितः।
शानन् चानश् तथा तत्र शतृश्च तृण् तृणा मतः॥
एषां योगे भवेत् षष्ठी निदर्शनं गृहाण मे।
शतरि स्याद् गृहं गच्छन् लिहानो मधु शानचि॥
क्वसौ स्याज् जग्मिवान् ग्रामं दधान वर्म्म कानचि।
पपिः सोमं भवेत् को च ददिर्गाः स्यात् पुनः किनि॥
उप्रत्यये यशो लिप्सुरुकि जलं च वषुकः।
अव्यये स्यात् कटं कृत्वा पुर्नारहः निदर्शनम्॥
क्ते प्रत्यये दिवं प्राप्तः क्तवतौ गतवात् गृहम्।
खलर्थे स्यात् पुनस्तत्र सुदुष्करं मया कृतम्॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

शानचि स्यात् पुनः सोमं पवमानो निदर्शनम् ।
पुत्रं मण्डयमानः स चानशि कीर्त्तितं पुनः ॥
व्याकरणमधीयन् स्यात् शतरि च निदर्शनम् ।
तृणि-भवेत् कटं कर्त्ता दर्शितं सर्व्वशो मया ॥

कमेरनिषेधः (वा)

कमेरुक्ति निषेधो न षष्ठी तत्र प्रवर्त्तते ।
लम्पटः कामुको दास्यास्तत्र ज्ञेयं निदर्शनम् ॥

द्विषः शतुर्व्वा (वा)

द्विषः शतुर्भवेत् षष्ठी पुनरिह विभाषया ।
द्विषन् मुरस्य वा मुरं भवेदिह निदर्शनम् ॥
एभिर्निषिद्ध्यते षष्ठी षष्ठी स्यात् कारके यदि ।
यत्र शेषे विवक्षा स्यात् तत्र षष्ठी भवेत् खलु ॥
नरकस्य स जिष्णुः स्यात् शेषे षष्ठी यदा भवेत् ।
कुर्व्वन् विप्रस्य तत्रैव पुनर्निदर्शनं धृतम् ॥

६२९ । अकेनोर्भविष्यदाधमर्ण्ययोः । २ । ३ । ७०
अगन्तस्य न षष्ठी स्यात् काले पुनर्भविष्यति ।
ओदनं भोजको याति भवेदकि निदर्शनम् ॥
इनश्चापि न षष्ठी स्याद् काले तत्र भविष्यति ।
ग्रामं गमी भवेत्तत्र ग्रामं गामी तथा पुनः ॥
इन्नन्तस्य न षष्ठी स्याद् भविष्यदाधमर्ण्ययोः ।
निदर्शनं शतं दायी दर्शिता काशिकाकृता ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

angotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foun

आधमर्ण्यं न चेत्तत्र न भविष्यत् पुनर्यदि ।
षष्ठी तत्र भवत्येव यवानां लावको यथा ॥

६३० । कृत्यानां कर्त्तरि वा । २ । ३ ७१

नित्यं प्राप्ता स्थिता षष्ठी कृद्योगे कर्तृकर्मणोः ।
कर्त्तरि कारके तस्य विकल्पं कल्पते मुनिः ॥
कृत्यानां योगतः षष्ठी कर्त्तरि स्याद् विभाषया ।
कर्त्तव्यं भवतः कर्म भवता वा निदर्शनम् ॥
विकल्पः कर्त्तरि ज्ञेयः कर्मणि न तथा भवेत् ।
गेयो मानवकः साम्नां नित्यं षष्ठी तु कर्मणि ॥

उभयप्राप्तौ कृत्या षष्ठ्याः प्रतिषेधो वक्तव्यः (वा)

उभयं चेद् भवेत् प्राप्तमुभयत्र निषिद्ध्यते ।
ग्राममजा हि नेतव्या रामेनेति यथा भवेत् ॥
सिद्धान्तकौमुदीग्रन्थे वार्त्तिकं नेह दृश्यते ।
तत्र योगविभागेन समाधानं प्रदर्शितम् ॥
'कृत्यानामि'ति भागः स्यात् पश्चात् स्यादनुवर्त्तनम् ।
वर्त्तत 'उभयप्राप्तौ' 'न' पुनरनुवर्त्तते ॥

६३१ । तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम् ।
२ । ३ । ७२

पक्षे षष्ठी तृतीया वा तुल्यार्थैर्योगतः पुनः ।
तुल्यः कृष्णस्य नेह स्यात् कृष्णेन वा निदर्शनम् ॥
तुला चेदुपमा चेद् वा न तृतीया विकल्प्यते ।
तत्र तु केवलं षष्ठी न तुला नोपमा हरेः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

६३२। चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः
२ । ३ । ७३

आयुष्यञ्च तथा मद्रं भद्रञ्च कुशलं तथा ।
सुखमर्थो हितमेभिश्चतुर्थी स्यात् सदाशिषि ॥
पक्षे षष्ठी भवत्येव चकारादनुकृष्यते ।
निदर्शनमहं वच्मि यथादृष्टं यथाश्रुतम् ॥
आयुष्यं हरये भूयात् हरेश्चैव तथा पुनः ।
मद्रं तस्मै पुनस्तस्य भद्रं तस्मै पुनस्तथा ॥
कुशलं च पुनस्तस्मै तस्येति वा भवेत् पुनः ।
सुखं तस्मै हितं तस्मै अर्थस्तस्मै तथैव च ॥
सुखं तस्य हितं तस्य अर्थस्तस्य तथा पुनः ।
एवं चान्यत्र विज्ञेयं यत्र यत्र प्रयोजनम् ॥

आयुष्यादीनां पर्य्यायग्रहणं कर्त्तव्यम् (व)

चिरजीवितमायुष्यं हितं पथ्यं सुखं च शम् ।
प्रयोजनं तथार्थश्च प्रयोगे दिक् प्रदर्शिता ॥
एवं सर्व्वत्र पर्य्याया ऊहनीयाः स्वबुद्धिभिः ।
तथा तथा प्रयोक्तव्या यथा यथा रुचिर्भवेत् ॥

———

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ngotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Fou

सप्तमी विभक्तिः

६३३। आधारोऽधिकरणम्। १।४।४५

कर्त्तृनिष्ठा क्रिया ज्ञेया कर्मनिष्ठा तथा पुनः।
तद्विधायाः क्रियायाः स्यादाधार इह कीर्त्तितः॥
स औपश्लेषिकः ज्ञेयो ज्ञेयो वैषयिकोऽपि सः।
स अभिव्यापको ज्ञेयस्त्रिधाधारो व्यवस्थितः॥
वने सिंहस्तिले तैलं मोक्षे वाञ्छा निदर्शनम्।
त्रिविधं दर्शितं क्षेत्रं यथायथं समाहर॥

६३४। सप्तम्यधिकरणे। २।३।३६

स्यादधिकरणे तत्र सप्तमीति सतां मतम्।
अन्तिकाच्च तथा दूरात् तथैव सप्तमी पुनः॥
आस्ते कटे भवेदादौ पुनरिह निदर्शनम्।
दूरे ग्रामस्य विज्ञेयमन्तिके च तथा भवेत्॥

वार्त्तिकम्

१) सप्तमीविधाने क्तस्येन्विषयस्य कर्मण्युपसंख्यनम्।
२) साध्वसाधुप्रयोगे च सप्तमी वक्तव्या।
३) कारकार्हाणाञ्च कारकत्वे सप्तमी वक्तव्या।
४) अकारकार्हाणाञ्च अकारकत्वे सप्तमी वक्तव्या।
५) ताद्विपर्य्यासे च सप्तमी वक्तव्या।
६) निमित्तात् कर्मसंयोगे सप्तमी वक्तव्या।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

१) स्यात् क्तस्येन्विधयस्येह सप्तमी वार्त्तिकात् पुनः ।
अधीती छन्दसि छात्रो भवेदिह निदर्शनम् ॥
२) साध्वसाधुप्रयोगे स्यात् सप्तमी च तथा पुनः ।
साधुर्मातरि स कृष्णः स्यादसाधुश्च मातुले ॥
३) यदा तु कारकार्हाणां कारकत्वं प्रतीयते ।
सप्तमी स्यात् तदा तेषामहर्णामिति वार्त्तिकात् ॥
सत्सु तरत्सु सर्व्वेषु त्वसन्त आसते यथा ।
सतां हि तरणं न्याय्यं तरणात्ते च कारकाः ॥
४) भवेदकारकार्हाणामकारकतया तथा ।
आसीनेषु दरिद्रेषु धनिनो भुञ्जते यथा ॥
कारकार्हा न दरिद्रा आसीना स्युरकारका ।
सप्तमी स्यात् ततश्चात्र प्राचीनानां निदर्शने ॥
५) यत्रार्हाणामनर्हत्वमनर्हाणा तथार्हता ।
विपर्य्यासे तदा ज्ञेया सप्तमीति च वार्त्तिकम् ॥

क) अर्हाणामनर्हत्वे

सत्सु तिष्ठत्स्वसन्तस्ते तरन्तीति निदर्शनम् ।
सतां च तरणं न्याय्यं न तरन्ति न कारकम् ॥

ख) अनर्हाणामर्हत्वे

तरत्स्वसत्सु सर्व्वेषु सन्तस्तिष्ठन्ति चापरम् ।
असन्तस्तरणार्हा न तरन्ति च तथार्हता ॥
६) निमित्तात् कर्मसंयोगे सप्तमीति च वार्त्तिकम् ।
चर्मणि द्वीपिनं हन्ति भाण्डे घृतं निदर्शनम् ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

६३५। यस्य च भावेन भावलक्षणम्। २।३।३७
सप्तमी स्यात् क्रिया यत्र लक्षयति क्रियान्तरम्।
रवावस्तं गते रामो जगामेति निदर्शनम्॥

६३६। षष्ठी चानादरे। २।३।३८
षष्ठी चानादरे ज्ञेया सप्तमी 'च'कारान् मता।
स्याद्रुदतः शिशोर्माता जगामेति निदर्शनम्॥
स्याद्रुदति शिशौ माता जगामेति च सप्तमी।
अनादरे भवेद् भावे षष्ठी च सप्तमी तथा॥

६३७। स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च।
२।३।३९
परे स्वामी भवेद् यस्मादीश्वरश्च पुनः परे।
अधिपतिः परे यस्मात् साक्षी यस्मात् परे भवेत्॥
प्रतिभूश्च परे यस्मात् प्रसूतश्च भवेत् परे।
तस्मादिह भवेत् षष्ठी सप्तमी च तथा भवेत्॥
गवां स्वामी भवेत् षष्ठी गोषु स्वामी च सप्तमी।
ऊहनीयं सर्वत्रैव तद्वदिह निदर्शनम्॥
प्राप्ता षष्ठी स्थिता तत्र पुनः षष्ठी विधीयते।
सप्तमी स्याद् यथा पक्षे तथा मुनि व्यचेष्टत॥

६३८। आयुक्तकुशलाभ्याञ्चासेवायाम्। २।३।४०
आयुक्तो व्यापृतो ज्ञेयः कुशलो निपुणो मतः।
षष्ठी च सप्तमी ताभ्यामासेवा गम्यते यदि॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

आसेवया च तात्पर्य्यं प्रकथितं बुधैरिह ।
आयुक्तो हरिपूजायाः कुशलो वा निदर्शनम् ॥
आयुक्तो हरिपूजायां कुशलो वा तथा भवेत् ।
षष्ठी च सप्तमी तत्र द्वयमेव प्रदर्शितम् ॥
आसेवा स्यान्न चेद् गम्या न षष्ठी सप्तमी भवेत् ।
आयुक्तः शकटे गौश्चेदीषद्युक्तः प्रतीयते ॥
आयुक्तकुशलाभ्याञ्च नेह पुनः प्रवर्त्तते ।
इहाधिकरणे ज्ञेया सप्तमीति निबोध मे ॥

६३९ । यतश्च निर्द्धारणम् । २ । ६ । ४१
पार्थक्यं विद्यते यत्र जाति-गुण-क्रियादिभिः ।
तत्र निर्द्धारणे ज्ञेया षष्ठी च सप्तमी तथा ॥
अभेदे विभागो यत्र तत्र सूत्रं प्रवर्त्तते ।
विभागे च पुनर्हेतुर्जातिर्गुणास्तथा क्रिया ॥
नृणां हि ब्राह्मणः श्रेष्ठो जातौ भवेन्निदर्शनम् ।
गवां कृष्णा बहुक्षीरा गुणे तच्च प्रदर्शितम् ॥
धावच्च गच्छतां शीघ्रः क्रियायां दर्शितं पुनः ।
नृषु गोषु च गच्छत्सु तत्र तत्र च सप्तमी ॥

६४० । पञ्चमी विभक्ते । २ । ३ । ४२
सति निर्द्धारणे यत्र विभागः पुनः कल्प्यते ।
तत्र निर्द्धारणाश्रयात् पञ्चमी स्यादिति स्थितिः ॥
भेदे यत्र विभागः स्यात् तत्र सूत्रं प्रवर्त्तते ।
बाधते च पुनः सूत्रं षष्ठीमिह च सप्तमीम् ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

पाटलिपुत्रकेभ्यः स्युराढ्यतरा हि माथुराः ।
भेदे चात्र विभागे स्यान्निदर्शनं सतां मते ॥

६४१। साधुनिपुणाभ्यामर्च्चायामप्रतेः । २ | ३ | ४३
न प्रतिर्युज्यते यत्र पुनरर्च्चा च गम्यते ।
साधुना निपुणेन स्यात् विभक्तिस्तत्र सप्तमी ॥
रामो मातरि साधुर्व्वा निपुणो वा निदर्शनम् ।
रामो पितरि साधुर्व्वा निपुणो वा तथा पुनः ॥
न सप्तमी न चेदर्च्चा साधुर्भृत्यो महीपतेः ।
इह तत्त्वकथा ज्ञेया नार्च्चा पुनः प्रतीयते ॥
यत्र प्रतिः प्रयुक्तः स्याद् द्वितीया स्याद् यथाप्रति ।
मातरं प्रति साधुः स द्वितीयायां निदर्शनम् ॥

अप्रत्यादिभिरिति वक्तव्यम् (वा)

'अप्रतेः' स्यान्न केवलं स्यादप्रत्यादिभिस्तथा ।
आदियोगात् परस्यापि ग्रहणं स्याद् यथोचितम् ॥
दृश्यते च परेर्योगादनुयोगान्न सप्तमी ।
कर्मप्रवचनीयत्वाद् द्वितीया स्याद् यथास्मृतम् ॥
मातरि परि साधुः सः परियोगे निदर्शनम् ।
मातरमनु साधुः सः स्यादनौ च तथा पुनः ॥

६४२। प्रासतोत्सुकाभ्यां तृतीया च । २ | ३ | ४४
प्रसितेन तृतीया स्यादुत्सुकेन तथैव च ।
पक्षे च सप्तमी प्राप्ता 'च'कारेण धृता भवेत् ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

प्रसितो हरिणा चैत्रो हरौ वा स्यान्निदर्शनम् ।
उत्सुको हरिणा चैत्रो हरौ वा स्यात्तथा पुनः ॥

६४३। नक्षत्रे च लुपि। २ | ३ | ४५
लुप्यति प्रत्ययो यत्र प्रत्ययार्थो न लुप्यति ।
तृतीया सप्तमी तत्र नक्षत्रात् स्यात्तदर्थकात् ॥
"मूलेनावाहयेद्देवीं श्रवणेन विसर्ज्जयेत्" ।
इह स्याल् लक्षितः कालो मूलेन श्रवणेन च ॥

६४४। सप्तमीपञ्चम्यौ कारकमध्ये। २ | ३ | ७
द्वयोः कारकयोर्मध्ये कालोध्वनौ च यौ मतौ ।
सप्तमी च भवेत्तयोः पञ्चमी च तथा पुनः ॥
अद्य भुक्त्वा द्व्यहे भोक्ता द्व्यहाद् भोक्ता निदर्शनम् ।
क्रोशे लक्ष्यमिहस्थोऽयं क्रोशाल्लक्ष्यं च विध्यति ॥

६४५। अधिरीश्वरे। १ | ४ | ९७
स्व-स्वमिभावसम्बन्धे भवेदधिस्तथैव च ।
अधि-भूवि स्थितो रामः अधिरामे तथा च भूः ॥

६४६। यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी।
२ | ३ | ९
अधिकन्तु मतं यस्माद् यस्यैश्वर्य्यं मतं भवेत् ।
कर्मप्रवचनीयत्वे सप्तमी स्यात् ततः पुनः ॥
भवेदुपपरार्थे च हरेर्गुणा निदर्शनम् ।
स्यादधिभुवि रामश्च निदर्शनं तथा पुनः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ngotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Fou

६४७। विभाषा कृञि। १।४।९८

भवेदधिः करोतौ वा यदीश्वरो मतो भवेत्।
निदर्शनं यदत्र त्वामधिकरिष्यतीति च॥
ईश्वरो विनियोगेन तदर्थं इह गम्यते।
न गति र्न 'तिङि' प्राप्तं न निधातस्तथा भवेत्॥

कारककारिका समाप्ता।

ग्रन्थकृत्-परिचयः

भुवनो जनको यस्य माता यस्य मृणालिनी।
प्रतिभा भगिनी यस्य भगिनी च मनोरमा॥
हरिणायां जनिर्यस्य ढाकेति च मण्डले।
रामपुरहाटे यस्य स्थितिरिह च कर्मणा॥
सोऽहं हरिपदो दत्तः करोमि कारिकामिह।
अष्टादशशतात् परं पञ्चनवतिवर्षके॥
वैशाखे तु धृतो ग्रन्थो ज्यैष्ठे ग्रन्थः समापितः।
विंशतिर्दिवसास्तावद् रचनायां गता मम॥
सप्तदश दिनं ज्यैष्ठे गुरुवारः स्थितस्तदा।
कृष्णपक्षे चतुर्द्दश्यां कृतिः समापिता मया॥
'ऊर्म्मिः' कृता कृताः 'कूहा' 'लिपिः' 'खुकी' कृता मया।
'सम्पुट'' च तथा 'वर्षाशतकं' च मया कृतम्॥
पाणिनीये तिङाश्रित्य 'तिङ्कारिका' कृता मया।
अस्मिन् ग्रन्थे स्थिताः श्लोकाः शतान्यष्टौ च सप्ततिः॥

———

Sri 78 019
CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Gangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Found

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Founda



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry